# आर्मी पब्लिक स्कूल अहमदनगरम्

## CLASS 10 Snskrit Questin Bank 2022-23

### चित्रवर्णनम्

**प्रश्न 1.अधोलिखितं चित्रं वर्णयन् संस्कृतने पञ्चवाक्यानि लिखत -**

मञ्जूषा - उद्यानम्, बालः, खेलतः, द्वौ, बाला करोति, पश्यति, वृक्षः, चित्रम्, रचयति, उपविशति, दोलायाम्, पादकन्दुकम्



उत्तर:

1. इदम् उद्यानस्य चित्रम् अस्ति ।
2. अत्र द्वौ वृक्षौ स्तः ।
3. उद्याने द्वौ बालौ दोलायां दोलायतः ।
4. त्रयः बालकाः पादकन्दुकं क्रीडन्ति ।
5. एका च बालिका चित्रं रचयति ।

**प्रश्न 2.अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

**मञ्जूषा - खेलन्ति, क्रीडाङ्गणे, वृक्षाः, बालाः, फुटबॉलक्रीडा, पश्यन्ति, गृहम्**



**उत्तर:**

1. इदं चित्रम् क्रीडाङ्गणस्य अस्ति ।
2. तत्र अनेके वृक्षाः सन्ति ।
3. क्रीडाङ्गणे एकं गृहम् अपि अस्ति ।
4. तत्र षट् बालाः फुटबॉलक्रीडां क्रीडन्ति ।
5. तान् माता-पिता द्वौ बालौ च पश्चन्ति ।

**प्रश्न 3. अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

मञ्जूषा - धावन्ति, प्रसन्नाः, सन्ति, हस्तौ, मेलयित्वा, कन्या, वेशभूषां, धारयन्ति, अस्ति, हसन्ति



उत्तर:

1. इदं चित्रम् वस्त्रविपणेः अस्ति ।
2. अत्र अनेकानि वस्त्राणि सज्जितानि सन्ति ।
3. स्व कन्याः कन्याभ्यः मेलयित्वा पितरौ प्रसन्नौ स्तः ।
4. तत्र अनेकानि सुन्दराणि वस्त्राणि विक्रयितुं सन्ति ।
5. बालाः परस्परं मिलित्वा हसन्ति ।

**प्रश्न 4.अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

मञ्जूषा - बालः, पश्यतः, बालः, वृक्षः, हरितः, पुष्पे, पादपाः, पत्राणि, पश्यन्ति



उत्तर:

1. इदं चित्रम् उपवनस्यः अस्ति ।
2. उपवने अनेके पादपाः वृक्षाः च सन्ति ।
3. द्वौ बालौ तत्र व्यायाम कुरुतः ।
4. दोलायां तिष्ठन्तौ द्वौ बालौ तौ पश्यतः ।
5. आकाशे अनेके खगाः उड्डयन्ति ।

**प्रश्न 5.अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

**मञ्जूषा - शाकविक्रेता, कोलाहलः, समूहः, आकारयन्ति, कदली, आलुकम्, पलाण्डु, गुञ्जनम्, प्रयच्छन्ति, विक्रीणन्ति**



**उत्तर:**

1. इदं चित्रम् शाक आपणस्य अस्ति ।
2. अत्र अनेकानि शाकानि विक्रयितुम् आगतानि सन्ति ।
3. आपणे अनेकानि फलानि अपि सन्ति ।
4. जनान् शाकविक्रेता समूहाः आकारयन्ति ।
5. अनेके जनाः शाकानि फलानि च क्रीणन्ति ।

**प्रश्न 6. अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

**मञ्जूषा - महाभारतम्, श्रीकृष्णः, अर्जुनाय, युद्धसमये, उपदेशान्, मोहात्, ददाति, कर्तव्यपालनम्, युद्धाय, सन्नद्धः**



उत्तरः

1. इदं चित्रम् महाभारत युद्ध समयस्य अस्ति ।
2. अत्र श्रीकृष्णः अर्जुस्य कर्तव्यपालनस्य उपदेशं यच्छति ।
3. अर्जुनः मोहग्रस्तः भूत्वा श्रीकृष्णस्य पादयोः पतति ।
4. चित्रे द्वयोः पक्षयोः सेनाः तिष्ठन्ति ।
5. सेनायाः सैनिकाः युद्धाय सन्नद्धाः सन्ति ।

**प्रश्न 7. अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

**मञ्जूषा - मुस्लिमधर्मावलम्बिनः, पालयन्ति, सेवई, इति मिष्टान्नम्, नूतनवस्त्राणि, वर्धापनानि, आलिङ्गनं, धार्मिकं सौहार्दम्, उत्सवः, मानयन्ति, उपासनागृहम्**



उत्तरः

1. इदं चित्रम् मुस्लिम धर्मिणाम् ईदपर्वणः अस्ति ।
2. अत्र मुस्लिम धर्मावलम्बिनः परस्परम् आलिङ्गन कुर्वन्ति ।
3. सर्वे जनाः नूतनवस्त्राणि धारिताः सन्ति ।
4. ते परस्परं उपासनागृहं गत्वा उपासना कुर्वन्ति ।
5. जनाः आस्मिन् दिवसे 'सेवई' इति मिष्टान्न खादन्ति ।

**प्रश्न 8. अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

**मञ्जूषा - ईसामसीहः, जन्म, दिसम्बरमासस्य, केक इत्याख्यं मिष्टान्नम्, नूतनवस्त्राणि, गिरिजागृहम्, उपासनापद्धतिः, शैत्यम्, सिक्थवर्तिका, सान्ताक्लॉज इति, उपहारणि, वाञ्छन्ति**



उत्तर:

1. इदं चित्रम् क्रिसमस पर्वणः अस्ति ।
2. अत्र सांताक्लॉज इति नाम पुरुषः बालान् उपहारं यच्छति ।
3. इदं पर्व दिसम्बर मासस्य पञ्चविंशाति तारिकायां मान्यते ।
4. ख्रीस्त जनाः गिरिजागृहम् गत्वा समवेतस्वरैः प्रार्थनां कुर्वन्ति ।
5. ते ईसामसीह महापुरुषस्य जन्म दिवस उपलक्ष्ये इदं पर्वं मानयन्ति ।

**प्रश्न 9.अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

**मञ्जूषा - चलचित्रम्, जनाः, सम्मर्दः, चलचित्रपटः, उत्सुकाः, चिकिटम्, खाद्यसामग्री, मध्यान्तरः, भारतम्, पश्यन्ति**



उत्तर:

1. इदं चित्र चलचित्रगृहस्य अस्ति ।
2. अनेके जनाः अत्र दृश्यन्ते ।
3. तत्र चलचित्रपटः अस्ति ।
4. जनाः चिटिकां क्रीत्वा चित्रपटम् पश्यन्ति ।
5. तत्र जनाः मध्यान्तरे खाद्यसामग्रीम् अपि खादन्ति ।

**प्रश्न 10. अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत -**

**मञ्जूषा - भारतद्वारम्, सैनिकाः, गणतंत्रदिवसः, पथसंचलनम्, ध्वजोत्तोलनम, भवित, राष्ट्रियपर्व,**

**अवकाशः जनसम्मर्द, सैनिकाः**



**उत्तर:**

1. इदं चित्रं गणतन्त्र दिवसस्य अस्ति ।
2. गणतन्त्र दिवससमारोहः सम्पूर्ण देशे मान्यते ।
3. परं सः दिल्ली नगरे प्रमुखरूपेण भारत द्वारे आयोज्यते ।
4. आस्मिन् देशस्य सैनिकाः, छात्राः पुरस्कारप्राप्ताः बालकाश्च पथसंचलनं कुर्वन्ति ।
5. राष्ट्रपतिः तत्र ध्वजोत्तोलनम् करोति ।

************

# *पत्रलेखनम्*

**प्र 1. भवान् रोहित: | भवत: विद्यालये वृक्षारोपणदिवस: मानित: तस्य वर्णयन् मित्रं विकासं प्रति अनुभूतं लिखिते पत्रे रिक्तस्थानानि मंजूषापदसाहाय्येन पूरयित्वा पत्रं पुन: लिखत**

**मञ्जूषा-**

| | | | | |
|---|---|---|---|---|
| **अस्तु ,** | **उत्सवे ,** | **नमस्ते ,** | **विद्यालये ,** | **कुशलम् ,** |
| **उत्साहेन,** | **शुद्धं ,** | **प्रयास: ,** | **पादप: ,** | **स्वविद्यालये ,** |

परीक्षाभावनात्

तिथि 02.04.2022

सप्रेम (i)........................... |

प्रिय मित्र उत्सव,

अत्रकुशलम् तत्र (ii) ...........................| गतसप्ताहे अस्माकं (iii)................. वृक्षारोपणदिवस: मानित: | तस्मिन् (iv).......................... सर्वै: छात्रै: (v)................ भागं गृहीत: | मया अपि एक: (vi)..................... आरोपित: | एष: (vii) .....................सर्वै: एव करणीय: | एतेन अवश्यं एव वातावरणं (viii) ............................भविष्यति | भवद्भि: अपि (ix) ........................एवं कर्तव्यम् शेषं सर्वं (x) ...................| पतृभ्यां चरणवन्दना |

भवत: मित्रम्

रोहित:

**प्र 2. स्वविद्यालयस्य वर्णनं कुर्वन्तः मित्रं प्रति लिखिते अस्मिन् पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत-**

**मञ्जूषा-**

| |
|---|
| **नमस्ते, क्रीडाक्षेत्रम्, मित्रम्, विद्यालयः, शोभनः, लेखिष्यामि, सद्व्यवहारशीलः, वयस्य, अध्यापकाः, पुस्तकालयः** |

परीक्षाभवनात्

तिथिः 05/04/2022

प्रिय (i)........................... !

(ii)…………………

भवतः पत्रं ह्यः एव प्राप्तम् । अहम् अधुना स्वविद्यालयस्य वर्णनं कर्तुम् इच्छामि । मम (iii) .................... अतीव (iv)......................अस्ति। मम विद्यालये विशालं (v) ........................., समृद्धाः प्रयोगशालाः सुन्दरः (vi).................. च सन्ति। उपप्रधानाचार्यः अतीव कर्मठः (vii)...................च अस्ति । अस्माकम् (viii)................मनोयोगेन पाठयन्ति । सर्वे छात्राः अपि योग्याः सन्ति। विस्तरेण पुनः (ix)................... ।

तव (x)................................

सुरेशः

**प्र 3. मित्रं प्रति अधोलिखितं पत्रं मञ्जूषाप्रदत्तशब्दैः पूरयित्वा पुनः लिखत।**

**मञ्जूषा-**

| |
|---|
| **गृहीतः , पितरौ , नमस्ते , मम , मित्रम् , राजपथम् , लोकनृत्यस्य , लोकनृत्यानि , गणतन्त्रदिवससमारोहस्य , प्रमुखसञ्चालकः।** |

यमुनाछात्रावासात्
दिनाङ्कः ....................
प्रिय मित्र माधव ,

( i ) ................. ।

अत्र कुशलं तत्रास्तु । अहं (ii) .................... सज्जायां व्यस्तः आसम् । अतः विलम्बेन तव पत्रस्य उत्तरं ददामि । अस्मिन् वर्षे मयापि गणतन्त्रदिवसस्य शोभायात्रायां भागः (iii) ...............। अस्माकं विद्यालयस्य छात्राः राजपथे (iv) ................ प्रदर्शनम् अकुर्वन् । अहं गरबानृत्यस्य (v) .................. आसम् । छात्राणां राष्ट्रगानस्य ओजस्वी ध्वनिः (vi) .............. गुञ्जितम् अकरोत् । स्वराष्ट्रस्य सैन्यबलानां पराक्रमप्रदर्शनानि , विचित्रवर्णनानि परिदृश्यानि , (vii) ............... च दृष्ट्वा अहं गौरवान्वितः अस्मि । (viii) ............... बाल्यावस्थायाः स्वप्नः तत्र पूर्णः जातः । भवतः ( ix ) ................ प्रति मम प्रणामाञ्जलिः ।

भवतः

( x ) ............. महेशः ।

4. अध्ययन प्रति मातरं समाश्वासयितुं पुत्र्या लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा पुनः लिखत।

| |
|---|
| **कुशलम्, प्रतियोगिताः, कुशलिनी, परिणामः, चिन्तिता, मतिम्, आनन्देन, करणीया, खेलप्रतियोगितासु, कालः** |

परीक्षाभवनतः

दिनाङ्कः ________

पूज्यमातृचरणाः,

प्रणतीनां शतम्।

अत्र अहं (i) __________। आशासे भवती पितृमहादेयः च (ii) __________ स्तः। मातः! अहं जानामि यद् भवती मम अर्धवार्षिक परीक्षापरिणामकारणात् (iii) __________ अस्ति। अत्र चिन्ता न (iv) __________ प्रथमसत्रे तु अहं (v) __________ रता आसम्। पठनाय तु (vi) __________ एव न आसीत् परम् अधुना तु सर्वाः (vii) __________ समाप्ताः। अद्यारभ्य अहं केवल पठने एव (viii) __________ विधास्यामि। आशासे वार्षिकपरीक्षायां मम (ix)

__________ भवताम् आशानुकूलः भविष्यति। शेषं सर्वं (x) __________ त्याः चरणयोः प्रणामाः
भवत्याः पुत्री
सुकन्या

5. जलसंरक्षणस्य महत्त्वं वर्णयतः मित्रस्य मित्रं प्रति लिखितं पत्रं मञ्जूषायां पदत्तपदैः पूरयित्वा पुनः लिखत-

| |
|---|
| **देशस्य, प्रयतमानाः, अपव्ययम्, विचारयति, जागरूकता, प्रयासः, जानीमः, जीवनम्, सह, अस्तु** |

छात्रावासतः
दिनाङ्कः _________
प्रिय मित्र!
सप्रेम नमोनमः,
अत्र कुशलं तत्र (i) ________। भवतः पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि यत् भवान् मित्रः (ii) ________ जनसंरक्षणप्रचारकार्ये रतोऽस्ति। एषः तु उत्तमः (iii) ________ अस्ति। वयं सर्वे एव (iv) ________ यत् जीवने जलस्य महत्त्वं तु अतुलनीयम्। जलम् एव (v) ________ इति वयं सर्वे जानीमः परं पुनरपि वयम् अस्य (vi) ________ कुर्मः। अनेन आगामिकाले कियान् भीषणजलसङ्कटः भवेत् इति कोऽपि न (vii) ________ संरक्षणार्थं (viii) ________ अनिवार्या एव। यदि जनाः अत्र ध्यान न दास्यन्ति तदा अस्माकं (ix) ________ स्थितिरपि अफ्रीकादेशवत् भविष्यति। यथा ते जलबिन्दुप्राप्त्यर्थं (x) ________ सन्ति तथा एव अस्मांक देशस्य अपि स्थितिः भविष्यति। अत: जलसंरक्षणार्थं जागरूकता अनिवार्या। शेषं सर्वं कुशलम्। पितृभ्यां चरणयोः चरणवन्दना।
भवतः मित्रम्
उमेशः

6. प्रतियोगिपरीक्षायाः सन्नद्धीकरणाय आरम्भतः एव सामान्यज्ञानस्य अभ्यासः करणीयः इति उपादिशता पित्रा पुत्र प्रति पत्रम्।

जयपुरतः
दिनाङ्कः 15.04.20xx

प्रिय पुत्र अविनाश!
शुभाशिषो लसन्तु
आशासे त्वं सकुशलः स्वाध्याये रतः असि। पुत्र! अहं जानामि परीक्षायां तव प्रस्तुतिः शोभना भवति। त्वं प्रतिवर्षं कक्षायां प्रथम स्थान प्राप्नोषि इति अहं जानामि। ग्रीष्मावकाशे त्वं कथितवान् यत् तव लक्ष्य प्रतियोगिपरीक्षामुत्तीर्य सङ्घलोकसेवा आयोगक्षेत्रे सेवाप्रदानम् अस्ति। पुत्र! एतल्लक्ष्य प्राप्तुं बाल्यकालादेव सामान्यज्ञानस्य अध्ययनं करणीयम्। अत एव विषयस्य अभ्यासेन समम् एकहोरापर्यन्तं सामान्यज्ञानं वर्धयितुं प्रतिदिनं समाचारपत्रं पठ यदि अधुनातः एतल्लक्ष्य प्राप्तुं नियमितम् अध्ययनं करिष्यसि नूनमेव साफल्यं लप्स्यसे। यदि काऽपि सहायता अपेक्षिता तर्हि अहम् करिष्यामि।

तव जनकः
आशीष कुमारः

7. जीवने सफलता लब्धं परिश्रमस्य महत्त्वं वर्णयन्त्याः मातुः पुत्रीं प्रति पत्रम् पूरयत-

कानपुरतः<br>दिनाङ्क: 05.09.20xx

प्रिय पुत्रि!
शुभाशीषोलसन्तु
अत्र सर्वं कुशलम् तत्रास्तु। तव प्रधानाचार्यायाः पत्रेण ज्ञातम् यत् त्वं नवमी-कक्षायां विद्यालयेषु प्रथम स्थानं लाब्धवान्। इदं समाचारं ज्ञात्वा अहम् अतिगद्गद अस्मि। भवान् परिश्रमस्य फल प्राप्तवान् आलस्यं त्यक्त्वा यथा भवान् परिश्रम कृतं तदा तु सफलता प्राप्तवान्। अस्माकं जीवन परिश्रमस्व अत्यधिक महत्त्वम् वर्तते। विना परिश्रमेण अस्माकं जीवनं निष्फलाः भवन्ति। अतएव त्वं निश्चयं कुर्याः यत् अग्रिमकक्षायाम् अधिक अंकम्प्राप्तुम् परिश्रमम् करिष्यति। यदि अधुनातः एतत्लक्षयं प्राप्तुम नियमित अध्ययनं करिष्यसि नूनम् एव साफल्यं लपस्यसे। यदि काऽपि सहायता अपेक्षिता तर्हि अहम् करिष्यामि। शेष कुशलम् अस्ति।

8. स्वदेशस्य संस्कृति वर्णयन्त्याः सख्याः विदेशिनी सखीं प्रति पत्र लिखत-

परीक्षाभवनत:<br>दिनाङ्क: 02.03.20xx

प्रिय सखी
सप्रेम नमोनमः
अत्र कुशलम् तत्रास्तु। अस्मिन् पत्रे अहं त्वाम् स्वदेशस्य संस्कृति विषये वर्णितुम् इच्छामि। अस्माकं संस्कृतिः प्राचीनतमा अस्ति। संस्कृतस्य साहित्यमपि संसारे सर्वेषाम् साहित्यानां प्राचीनतमम् अस्ति। संस्कृते लिखिता: वेदाः उपनिषदाः पुराणानि च हिन्दूनाम अनेके धार्मिकाः ग्रन्थाः सन्ति। संस्कृते एव वाल्मीके रामायणम् वेदव्यासस्य महाभारतं चापि परयामः भारते अनेके कवयः अभवन् ये नाटकानि काव्यानि च संस्कृत भाषायां अलिखन्। आशासे त्वम् अपि स्वदेशस्य संस्कृति विषये किञ्चित् लेखिष्यासि।
भवतः मित्रम्
निरंजन

9. 'पुत्रीं रक्ष पुत्री पाठय' इति अभियानं कथं सार्थक भविष्यतीति स्वविचारं प्रकटयन् मित्रं प्रति पत्रं लिखत-

परीक्षाभवनतः<br>दिनाङ्कः 28.03.20xx

प्रिय मित्र
सप्रेम नमोनमः

अत्र कुशल तत्र अस्तु। भवतं पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि, यत् भवान् मित्रैः 'पुत्रीं रक्ष पुत्री पाठय' प्रचार कार्ये रतोऽस्ति। एषः तु उत्तमः प्रयासः अस्ति। सम्माननीय प्रधानमन्त्रिणा श्रीमोदी सञ्चालितम् एतत् अभियानं कन्याना संरक्षणार्थे सम्पूर्ण देशे प्रचलाति इदम् अभियानं देशाय अति लाभकरं वर्तते। अनने देशे कन्यानाम् संख्याम् वृद्धिः अभवत्। अनेन अभियानेन नारी प्रति सम्मानम् वधिष्यति। शेषं सर्वं कुशलम्। पितृभ्यां चरणयोः चरणवन्दना।

भवतः मित्रम्

***********

## *सन्धि:*

### अभ्यासः

1. अधः प्रदत्तवाक्येषु सन्धिम्/सन्धिविच्छेद वा कृत्वा लिखत-

(i) वानराः सर्वत्र वृक्षे अपि _______ कूर्दन्ति।

(ii) के + अत्र _______ विद्यालयम् आगत्य कक्षां न आगताः।

(iii) हे शिशोऽत्र _______ + _______ आगत्य उपविश।

(iv) ते पठन्ति, तावपि _______ + _______ पठतः।

(v) यथा उचितं _______ कार्यं करणीयम्।

(vi) एतत् पुस्तकं तु तवैवास्ति _______ + _______ + _______

(vii) साधूपरि _______ + _______ गच्छतः।

(viii) कविः इन्द्रः _______ नवीनां कवितां श्रावयति।

(ix) कस्मिन्नपि अत्याचार: _______ + _______ तु न करणीयः।

(x) भानो + ए _______ जलार्पणं करणीयम्।

उत्तरम्:

(i) वृक्षेऽपि

(ii) केऽत्र

(ii) शिशो + अत्र

(iv) तौ + अपि

(v) यथोचित

(vi) तव + एव + अस्ति

(vii) साधु + उपरि

(vii) कवीन्द्रः

(ix) अति + आचारः

(x) भानवे

## व्यञ्जन-सन्धिः

1. उदाहरणमनुसृत्य सन्धिं सन्धिविच्छेदं वा कुरुत-

(क) चलत् + अनिशम् - चलदनिशम् एव उन्नतिं करोति।

(i) एतस्मादेव = _______ + _______ पाठात् त्वं पठ।

(ii) जगत् + ईशः = _______ सर्वत्र विद्यमानः।

(iii) यस्य शब्दस्य अन्ते स्वरः सः शब्दः अजन्तः = _______ + _______ कथ्यते।

(iv) शब्दरूपः सुप्+अन्तः = _______ कथ्यते, धातुरूपश्च तिङन्तः।

उत्तरम्:

(i) एतस्मात् + एव

(ii) जगदीशः

(iii) अच् + अन्तः

(iv) सुबन्तः

| |
|---|
| वर्गस्य प्रथम: वर्ण:+ वर्गस्य तृतीय:, चतुर्थ: वर्ण:, स्वर:, य्, र्, ल्, व् वर्णा:<br>↓<br>प्रथमवर्णस्य स्थाने तृतीय: वर्ण: (परिवर्तनम्) |

(ख) अस्मात् + नगरात् = अस्मान्नगरात् ग्रामः अतिदूरम्।

(i) सम्यक् + नेता = __________ एव राष्ट्रोन्नत्यै प्रयतते।

(ii) किन्नु = __________ + __________ खल्विदं लिखितम्।

(iii) सः प्रत्यक्+आत्मा = __________ भूत्वा परोपकारं करोति।

(iv) दिङ्नागः = __________ + __________ 'कुन्दमाला' इत्यस्य लेखकः।

(v) वर्षस्य षण्मासाः = __________ + __________'व्यतीताः।

उत्तरम्:

(i) सम्यग्नेता

(ii) किम् + नु

(iii) प्रत्यगात्मा

(iv) दिक् + नागः

(v) षड् + मासाः

(ग) सः कदाचित् ध्यानेन शृणोति कदाचित् + च = कदाचितच्च न।

(i) शरत् + चन्द्र = _________ मम मित्रस्य नाम।

(ii) मनुष्यः ज्ञानेन सफलं कुर्याज्जीवितम् = _________ + _________

(iii) मनस्+चञ्चलम् = _________ हि भवति।

(iv) हरिश्शेते = _________ + _________ वैकुण्ठे।

**उत्तरम्:**

(i) शरच्चन्द्रः

(ii) कुर्यात् + जीवितम्

(iii) मनश्चञ्चलम्

(iv) हरिः + शेते

> स्, तवर्ग + श्, चवर्ग
> ↓ ↓
> श्, चवर्ग (परिवर्तनम्)

(घ) धनुस् + टङ्कार-धनुष्टङ्कारः तु युद्धस्य संकेतः।

(i) प्रथमपंक्त्याः बालस् + षष्ठ = _______ पाठं पठेत्।

(ii) रामायणं वाल्मीकिना लिखितम्, तट्टीका = _______ + _______ च केन लिखिता?

(iii) मह्यम् पक्षिणाम् उत् + डयनम् = _______ अतीव रोचते।

(iv) टीकां तु लेखकष्टीकते = _______

**उत्तरम्:**

(i) बालष्षष्ठः

(ii) तत् + टीका

(iii) उड्डयनम्

(iv) लेखकस् + टीकते

> स्, तवर्ग + ष्, टवर्ग
> ↓ ↓
> ष्, टवर्ग (परिवर्तनम्)

(ङ) अतिथेः सद्-कारः-सत्कारः करणीयः।

(i) परिश्रमी छात्रः एव परीक्षायां सफलतां लभ + स्यते = ______

(ii) दिक्पालः = ______ + ______ कः भवति?

**उत्तरम्:**

(i) लप्स्यते

(ii) दिक् + पालः

> वर्गस्य द्वितीयः तृतीयः चतुर्थः वर्णः + वर्गस्य प्रथमः, द्वितीयः वर्णः, श्, ष्, स्
> ↓
> स्ववर्गस्य तृतीयः वर्णः भवति। (परिवर्तनम्)

(च) अ. हरिम् + वन्दे = हरिं वन्दे जगद्गुरुम्।

(i) अहम् + पुनः = _______ पाठं पठिष्यामि।

(ii) अपूर्व खलु = _______ + _______ आसीत् नाटके नायकस्य अभिनयम्।

(iii) त्वं माम् = _______ + _______ आकारयसि किम्?

(iv) श्रेष्ठम् + कर्म = _______ एव कर्तव्यम्।

**उत्तरम्:**

(i) अहंपुनः

(ii) अपूर्वम् + खलु

(iii) त्वम् + माम्

(iv) श्रेष्ठकर्म

| |
|---|
| पदान्त म् + व्यञ्जनवर्ण: |
| ↓ |
| अनुस्वार: (ं) (परिवर्तनम्) |

(छ) आ. अति सम् + चयः = सञ्चयः न कर्तव्यः।

(i) शीतकाले शैत्यं कम्पनम् + च = _______ अप्यनुभूयते।

(ii) शीतकाले रात्रौ सञ्चरणम् = _______ + _______ दुष्करम्।

(iii) भुजनगरम् + तु = _______ गुजरातराज्ये अस्ति।

(iv) त्वं किमर्थं कुम् + ठित: = _______ असि?

**उत्तरम्:**

(i) कम्पनञ्च

(ii) सत् + चरणम्

(ii) भुजनगरमस्तु

(iv) कुण्ठितः

| |
|---|
| म्/ अनुस्वार: + वर्गीय- व्यञ्जनम् |
| ↓ |
| परवर्ती-वर्गस्य पञ्चम:- (परिवर्तनम्) |

## विसर्ग-सन्धिः

1. उदाहरणमनुसृत्य सन्धिं सन्धिविच्छेदं वा कुरुत-

(क) हे मित्र! नमः + ते = नमस्ते।

(i) शत्रोः अपि शिरः + छेदः = शिरश्छेदः न करणीयः।

(ii) कठिना परिस्थितिः दारुणः + च = _______ कालः।

(iii) तुरका + तुरङ्गौः = _______ सह धावन्ति।

(iv) धनुष्टङ्कारः = _______ + _______ श्रूयते।

(v) सः कठिन तपस्तेपे = ________ + ________

**उत्तरम्:**

(ii) दारुणश्च

(ii) तुरश्तुरङ्गैः

(iv) धनु: + टङ्कारः

(v) तपः + तेपे

| |
|---|
| विसर्ग ( : ) + श्, च्, छ् |
| ↓ |
| श् (परिवर्तनम्) |
| विसर्ग + स्, त्, थ् |
| ↓ |
| स् (परिवर्तनम्) |
| विसर्ग + ष्, ट्, ठ् |
| ↓ |
| ष् (परिवर्तनम्) |

(ख) रामः वनमगच्छत् लक्ष्मणः + अपि = लक्ष्मणोऽपि तेन सह अगच्छत्।

(i) निर्धनः + जन:- निर्धनो जनः धनाभावे सदा दु:खितः भवति।

(ii) चौरः + अयम् = _______ मम स्यूतं चोरितवान्।

(iii) एकस्मिन् वने व्याघ्रः + नष्ट = _______ अभवत्।

(iv) पण्डितो जनः = _______ + _______ विद्वान् भवति।

(v) सः पठति ततोऽसौ = _______ + _______ लिखति।

(vi) तस्य मनोरथ = _______ + _______ सिध्यति।

उत्तरम्:

(ii) चोरोऽयम्

(iii) व्याघ्रोनष्टः

(iv) पण्डितः + जनः

(v) ततः + असौ

(vi) मनः + रथः

(ग) वने वह्निः + दह्यते = वह्निर्दह्यते पादपान्।

| |
|---|
| विसर्ग (:) + अ |
| ↓ |
| उ (गुण ओ) + ऽ (अवग्रह:) |
| विसर्ग (:) + वर्गस्य तृतीय:, चतुर्थ: वर्ण:, य्, र्, ल्, व्, ह् |
| उ (गुण ओ) |

(i) वसन्ते प्रकृतिः + एव = प्रकृतिरेव मनोहारिणी।

(ii) कन्या पितुः + गृहत् = ________ त्यक्त्वा पतिगृहं गच्छति।

(iii) नाविकः = ________ + ________ नौकां चालयति।

(iv) नाटककारः कविरपि = ________ + ________ च काव्यं कुरुतः।

(v) अहं पदातिरेव = ________ + ________ विद्यालयम् आगच्छामि।

उत्तरम्:

(ii) पितुर्गृहम्

(ii) नौ + इकः

(iv) कविः + अपि

(v) पदातिः + एव

| |
|---|
| अ, आ भिन्नस्वरात् परः विसर्गः + स्वरः, वर्गस्य तृतीयः, चतुर्थः पञ्चमो वा वर्णः स्यात्।<br>↓<br>र् (परिवर्तनम्) |

(घ) ध्यानेन न पठसि अतः + एव = अत एव उत्तमाकान् न प्राप्नेषि।

(i) आकाशे = _______ + _______ कपोता उत्पतन्ति।

(ii) अर्जुनः + उवाच = _______ अहं युद्धं न करिष्यामि।

(iii) विद्यालयं बालका आगच्छन्ति = _______ + _______ पठन्ति च।

(iv) बसयानेन स गच्छति = _______ + _______ विद्यालयम्।

(v) एषः + आगच्छति = _______ कार्यं करोति पठति च।

उत्तरम्:

(i) आ + काशे

(ii) अर्जुनोऽवाच

(iii) आ + गच्छन्ति

(iv) सः + गच्छति

(v) एषागच्छति

## अनुनासिकसन्धिः

1. अधोलिखितानां सन्धिं सन्धिविच्छेदं वा कुरुत-

(i) हे ईश्वर! सन्मतिं यच्छ।

(ii) हे छात्राः! सत् + मार्गे चलत।

(iii) प्रलयकाले सर्वत्र अम्मयं भवति।

(iv) जगन्नाथः सर्वान् रक्षति।

(v) तन्मात्रम् एव खाद।

(vi) कक्षायां षट् + नवतिः छात्राःसन्ति।

(vii) सा जगत् + माता इति रूपेण प्रसिद्धा अस्ति।

(viii) मम सन्मुखे तिष्ठ।

(ix) दिक् + नागः सर्वान् रक्षति।

उत्तरम्:

(i) सत् + मति

(ii) सन्मार्गे

(iii) अत् + मयं

(iv) जगत् + नाथ:

(v) तत् + मात्रम्

(vi) षण्नवतिः

(vii) जगन्माता

(vii) सत् + मुखेः

(ix) दिङ्नागः

## तुक् आगम-सन्धिः

2. अधोलिखितानि वाक्यानि पठत-

(i) ग्रीष्मे जनाः वृक्षच्छायां सेवन्ते।

(ii) हे छात्रा:! एकम् अनुच्छेदं लिखत।

(ii) पुरा भारते एकच्छत्र राज्यम् आसीत्।

(iv) आकाशः मेघैः आच्छन्नः अस्ति।

(v) सम्बन्ध-विच्छेद: न करणीयः।

उत्तरम्:

(i) वृक्षः + छायां

(ii) अनु + छेदं

(ii) एक + छत्रं

(iv) आ + छन्न:

(v) वि + छेद:

उपरि यानि रेखाङ्कितपदानि सन्ति तानि सर्वाणि 'तुक्' आगम-सन्धेः उदाहरणानि सन्ति।
तुक्-आगम: - सन्धौ यदि पूर्वपदे 'अ, इ, उ, ऋ स्वराः भवन्ति उत्तरपदे च 'छ' भवति तदा उभयो: पदयो: मध्ये 'च्' वर्ण: आगच्छति।

परं यदि पूर्वपदे आ, ई ऊ स्वरा: भवन्ति तदा 'च्' वर्णस्य आगम: विकल्पेन भवति।

यथा- लक्ष्मी-छाया = लक्ष्मी छाया / लक्ष्मीच्छाया

3. अधोलिखितानां सन्धिं सन्धिविच्छेदं वा कुरुत-

(i) शोधच्छात्राः - __________

(ii) विच्छेद: - __________

(iii) अनु + छेदः - __________
(iv) परि + छेदः - __________
(v) लक्ष्मीच्छाया - __________
(vi) वृक्ष + छाया - __________
(vii) तवः + छवि: - __________
(viii) वृक्षच्छेदनम् - __________
(ix) छुरिका + छिन्नः - __________
(x) शब्दच्छेदः

उत्तरम्:

(i) शोध + छात्रा:
(ii) वि + छेदः
(ii) अनुच्छेदः
(iv) परिच्छेदः
(v) लक्ष्मी + छाया
(vi) वृक्षच्छाया
(vii) तवच्छवि:
(viii) वृक्ष + छेदनम्
(ix) छुरिकाच्छिन्नः
(x) शब्द + छेदः

***********

## *प्रत्यया:*

### अभ्यासः

1. शतृप्रत्ययं योजयित्वा वाक्यपूर्तिं कुरुत-

(i) _______ धावकाः यशः प्राप्नुवन्ति। (धाव् + शतृ)
(ii) वस्त्राणि _______ रजकः श्रान्तः भवति। (नी + शतृ)
(iii) जलं _______ तृषार्ती सन्तुष्टौ स्तः। (पिब् + शतृ)
(iv) कथां _______ महिला शिशुं शाययति। (श्रु + शत)
(v) कार्य _______ स्रियः गीतं गायन्ति। (कृ + शत)

उत्तरम्:

(i) धावन्तः
(ii) नयन्
(iii) पिबन्तौ

(iv) शृण्वन्ती

(v) कुर्वन्त्यः

2. शानच्प्रत्ययं योजयित्वा वाक्यपूर्ति कुरूत-

(i) गुरुं सेव् + शानच् ____________ छात्राः सफलतां लभन्ते।

(ii) कष्टं सह + शानच् ____________ जनाः दु:खिनः भवन्ति।

(iii) सत्यं ब्रू + शानच् ____________ नराः सम्मान प्राप्नुवन्ति।

(iv) तस्य वध + शानच ____________ प्रगतिः पितरं हृष्यति।

(v) मुद् + शानच् ____________ बालिका नृत्यति।

उत्तरम्:

(i) सेवमानाः

(ii) सहमानाः

(iii) ब्रूवाणाः

(iv) वर्धमाना

(v) मोदमाना

3. अधोलिखितवाक्येषु रेखाङ्कितपदस्य शुद्धमुत्तरं प्रदत्तेभ्यः विकल्पेभ्यः चित्वा लिखत-

(i) कथां श्रु + शतृ महिलाः ज्ञानं लभन्ते।

शृण्वन्

शृण्वन्ती

शृण्वन्त्यः

(ii) गम् + शतृ बालिके चिन्तयतः।

गच्छन्ती

गच्छन्त्यौ

गच्छन्तौ

(iii) वद् + शतृ बालकम् आकारय।

वदन्

वदन्तौ

वदन्तम्

(iv) धाव् + शतृ क्रीडकेन पथिकः आहतः।

धावन्

धावन्तम्

धावता

(v) श्रान्तः भू + शतृ अरुणः स्वपिति।

भवन्

भवन्तौ

भवन्तः

उत्तरम्:

(i) शृण्वन्ती

(ii) गच्छन्ती

(iii) वदन्

(iv) धावन्

(v) भवन्

## अभ्यासः तव्यत् प्रत्ययः

### 1. रिक्तस्थानानि पूरयत-

(i) रमेण पाठः ___________। (लिख् + तव्यत्)

(ii) लतया पुष्पाणि न ___________। (त्रुट् + तव्यत्)

(iii) त्वया जलं वृथा न ___________। (कृ + तव्यत्)

(iv) त्वया उच्चैः न ___________। (वद् + तव्यत्)

(v) अस्माभिः बहिः ___________। (भ्रम् + तव्यत्)

(vi) सर्वैः सत्यं ___________। (वद् + तव्यत्)

(vii) युष्माभिः सन्तुलितभोजनम् एव ___________। (खाद् + तव्यत्)

(viii) अमितेन अवश्यमेव तत्र ___________। (गम् + तव्यत्)

(ix) नकुलेन पाठाः ___________। (पठ् + तव्यत्)

(x) तैः धर्मः ___________। (पाल् + तव्यत्)

उत्तरम्:

(i) लेखितव्यः

(ii) त्रोटितव्यानि

(iii) कर्तव्म्

(iv) वक्तव्यम्

(v) भ्रमितव्यम्

(vi) वक्तव्यम्

(vii) खादितव्यम्

(viii) गन्तव्यम्

(ix) पठितव्याः

(x) पालयितव्यः

### 2. कोष्ठकप्रदत्तशब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-

(i) ___________ एतत् कार्यं कर्तव्यम्। (अस्मद्)

(ii) ___________ खगाः रक्षणीयाः। (युष्मद्)

(iii) ___________ पाठाः पठितव्याः। (नमित)

(iv) ___________ अनुशासनं पालयितव्यम्। (सर्व)
(v) ___________ देशरक्षा कर्त्तव्या। (सैनिक)
(vi) ___________ मधुरं वक्तव्यम्। (जन)
(vii) ___________ परिश्रमः कर्त्तव्यः। (श्रमिक)
(viii) ___________ नियमाः पालयितव्याः। (अध्यापक)
(ix) ___________ मनसा पाठयितव्यम्। (शिक्षक)
(x) ___________ लेखौ लिखितव्यौ। (तत्)

उत्तरम्:

(i) मया / अस्माभिः
(ii) त्वया / युष्माभिः
(iii) नमितेन
(iv) सर्वैः
(v) सैनिकेन / सैनिकैः
(vi) जनेन / जनैः
(vii) श्रमिकेण / श्रमिकैः
(viii) अध्यापकेन
(ix) शिक्षकेण
(x) तेन / ताभ्याम्

3. कोष्ठकप्रदत्तशब्दैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-

(i) न्यायाधीशेन ___________ कर्त्तव्यः। (न्याय)
(ii) त्वया ___________ खादितव्यम्। (पौष्टिक भोजन)
(ii) सर्वैः प्रातः ___________ कर्त्तव्यम्। (भ्रमण)
(iv) तेन ___________ पठितव्याः। (कथा)
(v) अस्माभिः ___________ स्मर्तव्याः। (पाठ)
(vi) युष्माभिः ___________ एव सवितव्यानि। (सुचरित)
(vii) जनैः ___________ एव कर्तव्यानि। (सुकार्य)
(viii) छात्रैः ___________ प्रष्टव्याः। (प्रश्न)
(ix) बालैः ___________ न दूषयितव्यम्। (जल)
(x) यष्माभिः ___________ न त्रोटयितव्यानि। (पुष्प)

उत्तरम्:

(i) न्यायः
(ii) पौष्टिकभोजनं
(iii) भ्रमणं
(i) कथा:

(v) पाठा:

(vi) सुचरितानि

(vii) सुकार्याणि

(vii) प्रश्नाः

(ix) जलम्

(x) पुष्पाणि

## अनीयर्-प्रत्ययः

1. कोष्ठकप्रदत्तपदैः सह उचितां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत-

(i) युष्माभिः प्रातः उत्थाय __________। (पठ् + अनीयर्)

(ii) जनैः सर्वदा सर्वेषां कल्याणं __________। (कृ + अनीयर्)

(iii) अस्माभिः सुकार्याणि __________। (कृ + अनीयर्)

(iv) सर्वैः ईशवन्दना __________। (स्मृ + अनीयर)

(v) त्वया मधुराणि वचनानि __________। (वद् + अनीयर)

(vi) सैनिकैः दुःखं न __________। (गण् + अनीयर्)

(vii) अस्माभिः धर्मः __________। (आ + चर् + अनीयर्)

(viii) त्वया वृथा न __________। (वच् + अनीयर्)

(ix) जनैः प्रातः __________। (जागृ + अनीयर)

उत्तरम्:

(i) पठनीयम्

(ii) करणीयम्

(iii) करणीयानि

(iv) स्मरणीया

(v) वदनीयानि

(vi) गणनीयम्

(vii) आचरणीयः

(viii) वचनीयम्

(ix) जागरणीयम्

अभ्यासः

2. अधोलिखितवाक्येषु समुचितपदेन रिक्तस्थानपूर्तिं कुरुत-

(i) (बल + इन्) ______ जनाः निर्बलेषु बलप्रयोग न कुर्युः।

(ii) रथिनम् (______ + ______) जनम् वार्तायां मग्नं न कर्तव्यम्।

(iii) शिल्पिन्यः (______ + ______) बालिकाः कुत्र गताः?

(iv) दण्डिनि (______ + ______) जने न विश्वसिहि।

(v) (कर + इन्) __________ वने वसति।

(vi) धनिनः (______ + ______) गर्विताः न भवेयः।
(vii) सीता अवदत्-अहम् (______ + ______) (कुशल + इन्) अस्मि।
(viii) बलिनौ (______ + ______) अपमान न सेहेते।
(ix) (______ + ______) गुणिना जनेन एतत् कार्य सुष्ठु कृतम्।
(x) दण्डिनः (______ + ______) दण्डं धारयन्ति।

उत्तरम्:

(i) बलिनः
(ii) रथ + इन्
(iii) शिल्प + इन्
(iv) दण्ड + इन्
(v) करी
(vi) धन + इन्
(vii) कुशलिनी
(viii) बल + इन्
(ix) गुण + इन्
(x) दण्ड + इन

3. प्रदत्तशब्देषु मतुप् अथवा वतुप् प्रत्ययस्य यथापेक्षितं रूपं संयुज्य / वियुज्य लिखत-

(i) बुद्धिमती (______ + ______) नारी प्रशस्यते।
(ii) एतौ छात्रौ (शक्ति + मतुप्) ____________ स्तः।
(iii) ताः कन्याः गुणवत्यः (______ + ______) सन्ति।
(iv) लक्ष्मीवान् (______ + ______) लक्ष्म्याः आदरं कुर्यात्।
(v) _________ (धन + वतुप्) जनाः दरिद्राणां सहायता कुर्वन्तु।
(vi) सत्यवत्यै (______ + ______) नार्य पुस्तकं यच्छ।
(vii) (सत्य + वतुप्) __________ जनैः सदा सत्यभाषणं क्रियते।
(viii) बलवता (______ + ______) जनेन निर्बलेषु बलं न प्रयोक्तव्यम्।
(ix) (शक्ति + मतुप्) __________ नार्मा इदं कार्यं कृतम्।
(x) गुणवद्भिः (______ + ______) छात्रैः ध्यानेन पठ्यते।

उत्तरम्:

(i) बुद्धि + मतुप्
(ii) शक्तिमन्तौ
(iii) गुण + वतुप्
(iv) लक्ष्मी + मतुप्
(v) धनवन्तः
(vi) सत्य + वतुप्

(vii) सत्यवद्भिः
(viii) बल + वतुप्
(ix) शक्तिमत्या
(x) गुण + वतुप्

## इन् (णिनि) प्रत्ययः

अकारान्तशब्दैः सह 'युक्त' इत्यर्थे णिनि (इन्) प्रत्ययस्य प्रयोगः अपि भवति यथा-
गुण + णिनि (इन्) - गुणिन् - गुणैः युक्तः
दण्ड + इन् - दण्डिन् - दण्डने युक्तः
शिल्प + इन् - शिल्पिन् - शिल्पकलया युक्तः
कर + इन् - करिन् (गजः) - करेण (शुण्डेन) युक्तः
बल + इन् - बलिन् - बलेन युक्तः
एतेषां प्रयोगः अपि वाक्येषु शब्दरूपनिर्माणाय क्रियते।
अधः प्रदत्तवाक्येषु त्व/तल्-प्रत्ययस्य संयोजनं/वियोजनं वा कृत्वा रिक्तस्थानानि पूरयत-
(i) कृष्णसुदाम्नोः मित्रता (______ + ______) विश्वप्रसिद्धा।
(ii) विद्वत्वम् (______ + ______) च नृपत्वम् (______ + ______) च नैव तुल्यम्।
(iii) कार्येषु दीर्घसूत्रता (______ + ______) कदापि न कर्तव्या।
(iv) आकारस्य (लघु + त्व) __________ कार्यबाधकः न भवेत्।
(v) पशवः स्वपशुत्वम् (______ + ______) तु दर्शयन्ति एव।
(vi) वेदानां (महत् + त्व) __________ को न जानाति।
(vii) गङ्गायाः पवित्रता (______ + ______) जगत्प्रसिद्धा।
(viii) मूर्खः स्वमूर्खतां (______ + ______) सभायां न प्रदर्शयेत्।
(ix) नदीनां (दीर्घ + तल्) __________ चिन्तनात् परः विषयः।
(x) मित्रेण सह मित्रत्वम् (______ + ______) कदापि न त्याज्यम्।
उत्तरम्:
(i) मित्र + तल्
(ii) विद्वस + त्व, नृप + त्व
(iii) दीर्घसूत्र + तल्
(iv) लघुत्वं
(v) स्वपशु + त्व
(vi) महत्त्वं
(vii) पवित्र + तल्
(viii) स्वमूर्ख + तल्
(ix) दीर्घता
(x) मित्र + त्व

1. अधोलिखितेषु कोष्ठकप्रदत्तशब्दैः सह 'ठक्' प्रत्ययस्य प्रयोगं कृत्वा रिक्तस्थानानि पूरयत-

(i) __________ (धर्म + ठक्) जनाः धर्मम् एव आचरन्ति।

(ii) अद्य __________ (वर्ष + ठक्) परीक्षापरिणामः प्राप्स्यते।

(iii) अद्य वयं __________ (इतिहास + ठक्) स्थलानि द्रष्टुं गच्छामः।

(iv) __________ (प्रथम + ठक्) शिक्षा बाल्यतः एव भवति।

(v) __________ (सेना + ठक्) देशं रक्षन्ति।

(vi) अधना __________ (अध्यात्म + ठक्) शिक्षा अनिवार्या।

(vii) __________ (नगर + ठक्) एव देशम् उन्नयन्ति।

(viii) एताः __________ (विज्ञान + ठक्) चिन्तायां मग्नाः सन्ति।

उत्तरम्:

(i) धार्मिकाः

(ii) वार्षिक:

(iii) ऐतिहासिकानि

(iv) प्राथमिकी

(v) सैनिकाः

(vi) आध्यात्मिकी

(vii) नागरिकाः

(vii) वैज्ञानिकाः / वैज्ञानिक्यः

2. उपरि लिखितानि रेखाङ्कितपदानि स्त्रीलिङ्गे सन्ति। पुल्लिङ्गपदानां स्त्रीलिङ्गे परिवर्तनाय स्त्रीप्रत्ययाः प्रयुज्यन्ते। अत्र वयं टाप् ङीप् च प्रत्ययौ पठिष्यामः। टाप् प्रत्यये (आ) शिष्यते, ङीप् च प्रत्ययः (ई/आनी) शिष्यते।

नद + ङीप् - नदी

गोप + ङीप् - गोपी

महिष + ङीप् - महिषी

ब्राह्मण + ङीप् - ब्राह्मणी

वदन् + ङीप् - वदन्ती

श्रीमन् + ङीप् - श्रीमती

दातृ + ङीप् - दात्री

गुणिन् + ङीप् - गुणिनी

तपस्विन् + ङीप् - तपस्विनी

सर्वेषां रूपाणि नदीवत् भवन्ति यथा-गोपी गोप्यौ गोप्यः।

छात्र + टाप् - छात्रा

गायक + टाप् - गायिका

धावक + टाप् - धाविका

शिक्षक + टाप् - शिक्षिका
साधक + टाप् - साधिका
प्रथम + टाप् - प्रथमा
द्वितीय + टाप् - द्वितीया
सरल + टाप् - सरला
अज + टाप् - अजा
मूषक + टाप् - मूषिका
सुत + टाप् - सुता
बालक + टाप् - बालिका
सर्वेषां रूपाणि लतावत् भवन्ति यथा-गायिका गायिके गायिकाः

## अभ्यासः

### 1. शुद्धं विकल्पं चित्वा रिक्तस्थानानि पूरयत-

(i) इयं __________ पठति। (छात्र: / छात्रा)
(ii) बालिकासु __________ अध्ययनशीला अस्ति। (प्रथम: / प्रथमा)
(iii) शोभनानां भोजनानां __________ भव। (दातृ / दात्री)
(iv) एषा __________ हवनं करोति। (तपस्वी / तपस्विनी)
(v) गङ्गा एका __________ अस्ति। (नद / नदी)

उत्तरम्:
(i) छात्रा
(ii) प्रथमा
(iii) दात्री
(iv) तपस्विनी
(v) नदी

### 2. कोष्ठकप्रदत्तपदानां समुचितं प्रयोगं कुर्वन्तः / कुर्वन्त्यः रिक्तस्थानानि पूरयत-

मञ्जूषा
श्रीमती, प्राध्यापिका, नदी, तपस्विन्या, नदीम्, प्रथमा, मातुलानी, बालिकाः, गच्छन्ती, मेधाविनी, छात्राः

(i) इयम् एका __________ अस्ति।
(ii) __________ परितः वृक्षाः सन्ति।
(iii) __________ सह तस्य पुत्रः अपि प्रवचनं करोति।
(iv) एताः __________ सन्ति।
(v) ताः सर्वाः __________ सन्ति।
(vi) __________ वाचाला अस्ति।
(vii) ग्रामं __________ श्रमिका श्रान्ता अस्ति।

(viii) एषा बालिका __________ अस्ति।

(ix) मम __________ विदेशं गच्छति।

(x) __________ रमा एका __________ अस्ति।

उत्तरम्:

(i) नदी

(ii) नदीम्

(iii) तपस्विन्या

(iv) छात्राः

(v) बालिकाः

(vi) प्रथमा

(vii) गच्छन्ती

(viii) मेधाविनी

(ix) मातुलानी

(x) श्रीमती, प्राध्यापिका

*********

## *अव्यायानि*

**प्रश्न 1.उचिताव्ययपदैः रिक्तस्थानानि पूरयत-**

**मञ्जूषा**

| |
|---|
| सर्वत्र, एव, इति, ननु, एवम्, तत्र, उच्चैः, तथापि, बहुधा, मा |

(i) मम गुरुः _______________ भगवान् वाल्मीकिः।

(ii) कः _______________ भणति?

(iii) कपिता सा _______________ वदति।

(iv) त्वं _______________ गच्छ।

(v) यूयं चापलं _______________ कुरुत।

(vi) कृषीवल: बहुवार प्रयत्नमकरोत् _______________ वृषः नोत्थितः।

(vii) कृषक: बलीव _______________ पीडयति।

(viii) बहूनि अपत्यानि मे सन्ति _______________ सत्यम्।

(ix) सर्वेषु अपत्येषु जननी तुल्यवत्सला _______________ जलोपप्लवः सञ्जातः।

उत्तरम्:

(i) ननु

(ii) उच्चैः

(iii) एवम्

(iv) तत्र

(v) मा
(vi) तथापि
(vii) बहुधा
(viii) इति
(ix) एव
(x) सर्वत्र

**प्रश्न 2. उचितार्थैः सह मेलनं कुरुत-**

| | | |
|---|---|---|
| (i) | पुरा | नहीं/मत |
| (ii) | उच्चैः | हमेशा |
| (iii) | नूनम् | परंतु |
| (iv) | इत्थम् | ही |
| (v) | सर्वथा | इस प्रकार |
| (vi) | एवम् | सब प्रकार से |
| (vii) | एव | इस प्रकार से |
| (viii) | परम् | निश्चय |
| (ix) | सदा | ज़ोर से |
| (x) | मा | प्राचीनकाल में |

उत्तरम्:
(i) – प्राचीनकाल में
(ii) – ज़ोर से
(iii) – निश्चय
(iv) – इस प्रकार से
(v) – सब प्रकार से
(vi) – इस प्रकार
(vii) – ही
(viii) – परंतु
(ix) – हमेशा
(x) – नहीं / मत।

**प्रश्न 3.उचिताव्ययपदैः सह रिक्तस्थानानि पूरयत-**

मञ्जूषा

| | | | | |
|---|---|---|---|---|
| यथा-तथा, | यदि-तर्हि, | यथैव-तथैव, | यावत्-तावत्, | यत्र-तत्र। |

(i) ________ लवः ________ कुशः।

(ii) ________ अहं कृष्णवर्णः ________ त्वं किं गौराङ्गः!
(iii) ________ गुरुः वदति ________ शिष्यः करोति।
(iv) ________ वृक्षाः ________ खगाः।
(v) ________ लता आगच्छति ________ त्वं तिष्ठ।

उत्तरम्:

(i) यथा, तथा
(ii) यदि, तर्हि
(iii) यथैव, तथैव
(iv) यत्र तत्र
(v) यावत्, तावत्

**प्रश्न 4.उदाहरणानुसारं लिखत-**

(i) श्वः सोमवासरः.........................................
(ii) .........................................
(iii) .........................................
(iv) .........................................
(v) .........................................




उत्तरम्:

(i) अद्य रविवासरः।
(ii) परश्वः सोमवासरः अद्य शनिवासरः।
(iii) अधुना शुष्कता श्वः जलवर्षा भविष्यति।
(iv) तयः शनिवासरः अद्य रविवासरः।
(iv) अद्य मंगलवासरः हयः सोमवासरः।

**********

## **⁕समयः⁕**

**प्रश्न 1.अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत-**

उदाहरणम्-

द्वितलीयरेलवाहनं __________ (10:15) वादने जयपुरं प्राप्नोति।
द्वितयीयरेलवाहनं सपाददशवादने जयपुरं प्राप्नोति।

(i) पुरुषोत्तम-एक्सप्रेस इति रेलयानं __________ (9:30) वादने पुरीतः प्रस्थानं करोति।
(ii) चेतक-एक्सप्रेस इति रेलयानं __________ (4:45) वादने दिल्लीम् आगच्छति।
(iii) हावड़ा-एक्सप्रेस __________ (11:00) वादने हावडास्थानकं प्राप्नोति।
(iv) रेलयानमेकं __________ (8:15) उत्तराञ्चलं प्रति गच्छति।

उत्तरम्:
(i) सार्धनव
(ii) पादोनपञ्च
(iii) एकादश
(iv) सपादाष्टवादने

**प्रश्न 2. अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत-**

उदाहरणम्-
माता प्रातः __________ (5.00) वादने उत्तिष्ठति।
माता प्रातः पञ्चवादने उत्तिठति।
(i) राहुलः प्रातभ्रमणाय __________ (6:15) वादने उद्यानं गच्छति।
(ii) मल्लिका __________ (7:30) वादने प्रातराशं करोति।
(iii) अनन्या __________ (5:45) वादने क्रीडति।
(iv) सर्वे __________ (10:00) वादने शयनं कुर्वन्ति।

उत्तरम्:
(i) सवादषड्
(ii) सार्धसप्त
(iii) पदोनषड्
(iv) दश

**प्रश्न 3.अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत-**

उदाहरणम्-
प्रातः __________ (7.00) वादनतः __________ (7.45) वादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।

उत्तरम्:
सप्त, पादोनाष्ट
प्रातः सप्तवादनतः पादोनाष्टवादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।
(i) __________ (8:15) वादनतः __________ (9:00) वादनपर्यन्तं विज्ञानविषस्य कालांशः भवित।
(ii) वयं __________ (9:00) वादनतः __________ (9:45) वादनपर्यन्तं गणितविषयं पठामः।
(iii) __________ (2:45) वादनतः __________ (3:30) वादनपर्यन्तं हिन्दीभाषाकालांशः भवति।
(iv) सस्कृतशिक्षकः __________ (10:15) वादने अध्यापयति।

उत्तरम्:
(i) सपादाष्ट, नव
(ii) नव, पादोन-दश

(iii) पादोन-त्रि, सार्धत्रि
(iv) सपाद-दश

**प्रश्न 4. अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत-**

उदाहरणम्-
छात्रः __________ (5.00) वादने उत्तिष्ठति __________ (6.15) वादने व्यायाम करोति।
छात्रः पञ्चवादने उत्तिष्ठति सपादषड्वादने व्यायाम करोति।
(i) छात्रः __________ (7:30) वादने प्रातरांश कृत्वा __________ (9:45) वादने विद्यालयं गच्छति।
(ii) __________ (4:00) वादने गृहमागत्य __________ (4:30) वादनपर्यन्तं विश्रामं करोतिः।
(iii) __________ (5:00) वादने भोजनं कृत्वा __________ (9:30) वादनपर्यन्तं अध्ययनं करोति।
(iv) रात्रौः __________ (9:45) वादनतः __________ (5:00) वादनपर्यन्तं शयनं करोति।
उत्तरम्:
(i) सार्धसप्त, पादोन दश
(ii) चतुर्, सार्धचतुर्
(iii) पञ्च, सार्धनव
(iv) पादोन दश, पञ्च

***********

## *वाच्यम् अभ्यासः*

**प्रश्न 1.अधोलिखितवाक्येषु कर्तृपदं परिवर्त्य वाक्यानि लिखत-**

(i) बालकः पायसं खादति।
________ पायसः खाद्यते।
उत्तरम्:- बालकेन
(ii) अहं फलं खादामि।
________ फलं खाद्यते।
उत्तरम्:- मया
(iii) त्वं किं शृणोषि?
________ किं श्रूयते?
उत्तरम्:- त्वया

(iv) आवां चित्राणि पश्यावः।

_________ चित्राणि दृश्यन्ते।

उत्तरम्:- आवाभ्याम्

(v) वयं पाठं स्मरामः।

_________ पाठः स्मर्यते।

उत्तरम्:- अस्माभिः

(vi) बालकौ धावतः।

_________ धाव्यते।

उत्तरम्:- बालकाभ्याम्

(vii) कुक्कुराः इतस्ततः भ्रमन्ति।

_________ इतस्ततः भ्रम्यते।

उत्तरम्:- कुक्कुरैः

(viii) गजः शनैः शनैः चलति।

_________ शनैः शनैः चल्यते।

उत्तरम्:- गजेन

(ix) वानरः कूर्दति।

_________ कूर्यते।

उत्तरम्:- वानरेण

(x) अहं शाटिकां क्रीणामि।

_________ शाटिका क्रीयते।

उत्तरम्:- मया

**प्रश्न 2.अधोलिखितवाक्येषु कर्मपदं परिवर्त्य वाक्यानि लिखत-**

(i) श्रमिकः भारं वहति।

श्रमिकेण _________ उह्यते।

उत्तरम्:- भारः

(ii) सः पाषाणं त्रोटयति।

तेन _________ त्रोट्यते।

उत्तरम्:- पाषाणः

(iii) सा गीतं गायति।

तया _________ गीयते।

उत्तरम्:- गीतं

(iv) माता रोटिकां पचति

मात्रा _________ पच्यते।

उत्तरम्:- रोटिका

(v) पिता फलानि आनयति।

पिता ________ आनीयन्ते।

उत्तरम्:- फलानि

(vi) सेवकः सेवां करोति।

सेवकेन ________ क्रियते।

उत्तरम्:- सेवा

(vii) चिकित्सक: उपचारं करोति।

चिकित्सकेन ________ क्रियते।

उत्तरम्:- उपचारः

(viii) नीलिमा पाठं स्मरति।

नीलिमया ________ स्मर्यते।

उत्तरम्:- पाठः

(ix) अहं गृहं गच्छामि।

मया ________ गम्यते।

उत्तरम्:- गृह

(x) आवां लेखान् लिखावः।

आवाम्यां ________ लिख्यन्ते।

उत्तरम्:- लेखाः

**प्रश्न 3.अधोलिखितवाक्येषु क्रियापदपरिवर्तनं कृत्वा वाक्यानि लिखत-**

(i) अहं जलं पिबामि।

मया जलं ________।

उत्तरम्:- पीयते

(ii) आवां विद्यालयं गच्छावः

आवाभ्यां विद्यालयः ________।

उत्तरम्:- गम्यते

(iii) वयं ग्रामं गच्छामः।

अस्माभिः ग्रामः ________।

उत्तरम्:- गम्यते

(iv) त्वं फलानि खादसि।

त्वया फलानि ________।

उत्तरम्:- खाद्यान्ते

(v) छात्रः अध्ययनं करोति।

छात्रेण अध्ययनं ________।

उत्तरम्:- क्रियते

(vi) अहं श्रान्तः भवामि।

मया श्रान्तः ________।

उत्तरम्:- भूयते

(vii) बालकः क्रीडति।

बालकेन ________।

उत्तरम्:- क्रीड्यते

(viii) शिष्यः गुरुं सेवते।

शिष्येण गुरुः ________।

उत्तरम्:- सेव्यते

(ix) पाचकः भोजनं पचति।

पाचकेन भोजनं ________।

उत्तरम्:- पञ्चते

(x) धावकः धावति।

धावकेन ________।

उत्तरम्:- धाव्यते

*********

## *अशुद्धिसंशोधना अभ्यास:*

**1. अधोलिखितानि वाक्यानि शुद्धानि कुरुत-**

प्रश्न i. वयं चित्रं पश्यन्ति ।

उत्तरम्:- ते चित्रं पश्यन्ति ।

प्रश्न ii. भवान् भोजनं खाद ।

उत्तरम्:- भवान् भोजनं खादतु ।

प्रश्न iii. त्वं पाठं स्मरतु ।

उत्तरम्:- त्वं पाठं स्मर ।

प्रश्न iv. सः पीतः वस्त्रं धारयति ।

उत्तरम्:- सः पीतं वस्त्रं धारयति ।

प्रश्न v. त्रीणि वृक्षाः तत्र शोभन्ते ।

उत्तरम्:- त्रयः वृक्षाः तत्र शोभन्ते ।


**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)**

1. 'जगाद इति क्रियापदस्य कर्तृपदं किम्?
2. भार्या' इतिपदस्य विशेषणपदं किम्?
3. 'आगच्छन्तम्' इति क्रियापदस्य विपर्यय पदं गद्यांशे किम्?
4. अनुच्छेदे 'राजपुत्रः' इति कर्तृपदस्य क्रियापदं किम्?

**उत्तराणि:**

1. सा
2. बुद्धिमती
3. गच्छन्तम्
4. वसति स्म

(ख) इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।
निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।

अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्॥
भयाकुलं व्याघ्नं दृष्ट्वा कश्चित् धूर्तः शृगालः हसन्नाह-"भवान् कुतः भयात् पलायितः?"
व्याघ्रः-गच्छ, गच्छ जम्बुक! त्वमपि किञ्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाह हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।
शृगालः-व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?
व्याघ्रः-प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. कीदृशः व्याघ्रः नष्टः?
2. धूर्तः शृगालः किम् कुर्वन्तम् अवदत्?
3. व्याघ्रण किम् आवेदितम्?

**उत्तराणि:**

1. भयाकुलचितः
2. हसन्
3. महत्कौतुकम्

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. व्याघ्रः जम्बुकम् प्रति किम् कथयति?
2. इति श्रुत्वा किं मत्वा व्याघ्रः भयाकुलचित्त नष्टः!

**उत्तराणि:**

1. व्याघ्रः जम्बुकम् प्रति कथयति-गच्छ, गच्छ जम्बुक! त्वमपि किञ्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।
2. इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. 'जम्बुकः' इति पदस्य पर्यायपदं गद्यांशे किमस्ति?
2. 'शृगालः' इतिपदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?
3. 'रुदन्' इति क्रियापदस्य विपर्यय पदं गद्यांशे किम्?
4. अनुच्छेदे 'हसन्नाह' इति क्रियापदस्य कर्तृपदं किम्?

**उत्तराणि:**

1. शृगालः
2. धूर्तः

3. हसन्
4. शृगालः

(ग) जम्बुकः-स्वामिन्! यत्रास्ते सा धूर्ता तत्र गम्यताम्। व्याघ्र! तव पुनः तत्र गतस्य सा सम्मुखपीक्षते यदि, तर्हि त्वया अहं हन्तव्य इति।
व्याघ्रः-शृगाल! यदि त्वं मां मुक्त्वा यासि सदा वेलाप्यवेला स्यात्।
जम्बुकः-यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्। स व्याघ्रः तथाकृत्वा काननं ययौ। शृगालेन सहितं पुनरायान्तं व्याघ्र दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती-जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम्? परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्तयङ्गल्या तर्जयन्त्युवाच-
रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्यायैकमानीय कथं यासि वदाधुना।।

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. व्याघ्रजम्बुकौ कुत्र ययौ?
2. "त्वया अहं हन्तव्यः" इति कः कथयति?
3. यदि शृगालः व्याघ्र मुक्त्वा यास्यति तदा का स्यात्?

**उत्तराणि:**

1. काननम्
2. जम्बुक:
3. वेलाप्यवेला

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. सा बुद्धिमती किम् चिन्तितवती।
2. सा प्रत्युत्पन्नमतिः बुद्धिमती कथम् उवाच?

**उत्तराणि:**

1. सा बुद्धिमती चिन्तितवती-जम्बुककृतोत्साहाद् व्याधात् कथं मुच्यताम्?
2. प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्गल्या तर्जयन्त्युवाच

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. शीघ्रम्' इति पदस्य पर्यायपदं गद्यांशे किमस्ति?
2. 'बद्ध्वा' इति पदस्य विपर्ययपदं गद्यांशे किम्?
3. 'सा धूर्ता' अत्र विशेषणपदं किम्?
4. संवादे 'उवाच' इति क्रियापदस्य कर्तृपदं किम्?

**उत्तराणि:**

1. सत्वरम्
2. मुक्त्वा
3. धूर्ता
4. सा

**2. अधोलिखितेषु कथनेषु स्थूलपदानि आधृत्य प्रश्ननिर्माणं क्रियतम्-**

(क) बुद्धिमती पितुर्गृह प्रति चलिता।

(i) कस्मै

(ii) कम्

(ii) कयो

(iv) के

उत्तराणि:- (ii) कम्

(ख) सा धाष्ात् पुत्रौ चपेटया जगाद।

(i) कस्मात्

(ii) कीदृशम्

(iii) कम्

(iv) कः

उत्तराणि:- (i) कस्मात्

(ग) मार्गे सा एकं व्यानं ददर्श।

(i) कयो

(ii) के

(iii) कुत्र

(iv) कम्

उत्तराणि:- (iv) कम्

(घ) सा व्याघ्रमागच्छन्तं दृष्ट्वा उवाच।

(i) का

(ii) कीदृशम्

(iii) कम्

(iv) कुत्र

उत्तराणि:- (i) का

(ङ) व्याघ्रमारी काचिदियमिति मत्वा भयाकुलचित्तो नष्टः।

(i) कीदृशः

(ii) का

(iii) किमर्थम्

(iv) कस्मात्

उत्तराणि:- (ii) का

(च) कश्चित् धूर्तः शृगालः हसन् आह।

(i) कीदृशः

(ii) कः

(ii) केन

(iv) कुत्र

उत्तराणि:- (i) कीदृशः

(छ) गच्छ, जम्बुक! किञ्चिद् गूढप्रदेशम्।

(i) कः

(ii) केन

(iii) कीदृशम्

(iv) का

उत्तराणि:- (iii) कीदृशम्

(ज) त्वम् मानुषादपि बिभेषि।

(i) कस्मात्

(ii) केन

(iii) कः

(iv) कुत्र

उत्तराणि:- (i) कस्मात्

(झ) पुत्रौ व्याघ्रक्षणाय कलहं कुरुथः।

(i) किमर्थम्

(ii) कः

(iii) केन

(iv) कुत्र

उत्तराणि:- (i) किमर्थम्

(ञ) माम् निजगले बद्ध्वा चल सत्वरम्।

(i) कुत्र

(ii) किमर्थम्

(iii) कः

(iv) कुत्र

उत्तराणि:- (i) कुत्र

(ट) परं प्रत्युपन्नमतिः सा जम्बुकम् उवाच।

(i) कीदृषः

(ii) कीदृशी

(iii) का

(iv) कः

उत्तराणि:- (ii) कीदृशी

(ठ) पुरा त्वया मह्यम् त्रय व्याघ्र दत्तम्।

(i) कया

(ii) केन

(iii) कस्यै

(iv) कस्मै

उत्तराणि:- (ii) केन

(ड) व्याघ्रः शृगालेन सहितं पुनः आगच्छत्।

(i) कम्

(ii) कस्मात्

(iii) कथम्

(iv) केन

उत्तराणि:- (iv) केन

(ढ) देउलाख्यो ग्रामे राजसिंह वसतिस्म।

(i) कस्मिन्

(ii) कीदृशे

(iii) कयो

(iv) के

उत्तराणि:- (i) कस्मिन्

(ण) तत्र राजसिंहः नाम राजपुत्रः वसतिस्म्

(i) कुत्र

(ii) यत्र

(iii) कस्मिन

(iv) कः

**उत्तराणि**:- (i) कुत्र

**3. अधोलिखित श्लोकानाम् अन्वयं मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्।**

(क) निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमॉल्लोके मुच्यते महतो भयात्॥

**अन्वयः**- सा भामिनी निज (i) _______ व्याघ्रस्य भयात् (ii) _______ लोके अन्यः अपि (iii) _______ (निजबुद्ध्या ) महतो (iv) _______ मुजयते।

**मञ्जूषा-** भयात्, बुद्ध्या, बुद्धिमान्, विमुक्ता

**उत्तराणि:**

(i) बुद्ध्या

(ii) विमुक्ता

(iii) बुद्धिमान्

(iv) भयात्

(ख) रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्यायैकमानीय कथं यासि वदाधुना।।
इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा।
व्याघ्रोऽपि सहसा नष्टः गलबद्धशृगालकः।।

**अन्वयः-** रे रे धूर्त पुरा त्वया (i) _______ व्याघ्र (ii) _______ दत्तम्। विश्वास्य (अपि) अद्य (iii) _______ आनीय कथं यासि इति अधुना (iv) _______

**मञ्जूषा-** | मह्यम्, त्रयं, वद, एकम्। |

**उत्तराणि:**

(i) त्रयं

(ii) मह्यम्

(iii) एकम्

(iv) वद

**4. अधोलिखित श्लोकानाम् भावार्थम् मञ्जूषायाः सहायतया उचित-क्रमेण पूरयत्-**

(क) निजबुध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमाल्लोके मुच्यते महतो भयात्॥

**भावार्थः-** यथा सा रूपवती स्त्र निज (i) _______ प्रमोवेण व्याघ्रस्य (ii) _______ विमुक्ता तथा अस्मिन् संसारे यः (iii) _______ भवाम् अर्थात् यः बुद्धे (iv) _______ करोति सः अपि (सोऽपि) महतो भयात् मुच्यते (भुक्तः भवति)।

**मञ्जूषा-** | बुद्धिमान्, भयात्, उपयोग, बुद्धः |

**उत्तराणि:**

(i) बुद्धः

(ii) भयात्

(iii) बुद्धिमान्

(iv) उपयोगं

(ख) रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्यायैकमानीय कथं यासि वदाधुना।।
इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा।
व्याघ्रोऽपि सहसा नष्टः गलबद्धशृगालकः।।

**भावार्थः-** अस्य भावोऽस्ति यत् अस्मिन संसारे सर्वेषु कार्याषु (i) ________ च बुद्धि एवं बलयुक्ता भवति (ii) ________ बलस्य अन कस्यापि (iii) ________ कदापि न तिष्ठति। अनेनं एवं जनः (iv) ________ प्रूरायितुम् शक्तोति।

**मञ्जूषा-** | बल, कालेषु, स्वकामनाः, बुद्धेः |

**उत्तराणि:**

(i) कालेषु

(ii) बुद्धेः

(iii) बलं

(iv) स्वकामनः

(ग) बुद्धिर्बलवती तन्वि सर्वकार्येषु सवर्दा।

**भावार्थः-** अस्य भावोऽस्ति यत् अस्मिन संसारे सर्वेषु (i) ________ च बुद्धि एवं बलयुक्ता भवति। (ii) ________ बलस्य अने कस्यापि (iii) ________ कदापि न तिष्ठति। अनेन एवं जनः (iv) ________ प्रूरयितुम् शक्तोति।

**मञ्जूषा-** | बुद्धेः, बलं, स्वकामनः, कालेषु. |

**उत्तराणि:**

(i) कालेषु

(ii) बुद्धः

(iii) बलं

(iv) स्वकामनाः

**5. (अ) निम्नलिखितानां वाक्यानां कथाक्रमानुसारम् संयोजित्वा पुनः लिखत।**

(क) बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।

(ख) तस्यभार्या बुद्धिमती आसीत्।

(ग) मार्गे सा एकं व्याघ्रं ददर्श।

(घ) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

(ङ) राजसिंहः नाम राजपुत्रः वसति स्म।

(च) अस्ति देउलाख्यो नाम ग्रामः।

(छ) सा पुत्रद्वयोपेता पितृहं प्रति चलिता।

(ज) सा धाष्ात् पुत्रौ चपेटया प्रहत्य जगाद।

**उत्तराणि:**

(क) अस्ति देउलाख्यो नाम ग्रामः।

(ख) राजसिंहः नाम राजपुत्रः वसति स्म।

(ग) तस्यभार्या बुद्धिमती आसीत्।

(घ) सा पुत्रद्वयोपेता पितृह प्रति चलिता।

(ङ) मार्गे सा एकं व्याघ्र ददर्श।

(च) सा धाष्ात् पुत्रौ चपेटया प्रहत्य जगाद।

(छ) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

(ज) बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।

(आ) (क) कथम् एकैकशः व्याघ्रभक्षणाय कलह कुरुथः।

(ख) कश्चित् धूर्तः शृगालः हसन्नं अवदत्।

(ग) त्वम् मानुषादपि बिभेषि।

(घ) तस्यद्वभार्या बुद्धिमती पुत्रयोपेता पितृह प्रति चलित।

(ङ) भवान् कुतः भयात् पलायितः।

(च) तौ एव विभज्य भुज्यताम्।

(छ) व्याघ्रः भयाकुलचित्तो नष्टः

(ज) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

**उत्तराणि:**

(क) तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितृहं प्रति चलिता।

(ख) कथम् एकैकशः व्याघ्रभक्षणाय कलहं कुरुथः।

(ग) तौ एव विभज्य भुज्यताम्।

(घ) व्याघ्रः भयाकुलचित्तो नष्टः।

(ङ) कश्चित् धूर्तः शृगालः हसन्नं अवदत्।

(च) भवान् कुतः भयात् पलायितः।

(छ) त्वम् मानुषादपि बिभेषि।

(ज) बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत्।

**6. पर्यायपदानि समुचित मेलनं कुरुत-**

| खण्ड 'क' | खण्ड 'ख' |
|---|---|
| शीघ्रम् | सत्वरम् |
| उच्यते | कथ्यते |
| जगाद | अवदत् |
| ददर्श | दृष्टवान् |
| पुरा | प्राचीनकाले |
| वेला | समयः |
| कौतुकम् | उत्सुकता |
| दृष्ट्वा | अवलोक्य |
| ययौ | गतवान् |
| बुद्ध्या | मत्या |
| वनम् | काननम् |
| जम्बुकः | श्रृगालः |
| पत्नी | भार्या |
| ईक्षते | पश्यति |
| अत्तुम् | खादितुम् |
| आक्षिपन्ती | आक्षेपं कुर्वन्ती |

**7. (अ) 'क' स्तम्भे विशेषणपदं लिखितम् 'ख' स्तम्भे पुनः विशेष्यपदम्। तयोः मेलनं कुरुत-**

| 'क' स्तम्भ | | 'ख' स्तम्भ | |
|---|---|---|---|
| (क) | बुद्धिमती | (i) | व्याघ्रं |
| (ख) | एकं | (ii) | कानन |
| (ग) | गहन | (iii) | व्याघ्रः |
| (घ) | धूर्तः | (iv) | व्याघ्रमारी |
| (ङ) | भयाकुलः | (v) | व्याघ्रात् |
| (च) | इयम् | (vi) | भार्या |
| (छ) | उत्साहाद् | (vii) | श्रृगालः |

**उत्तराणि:**

(क) (vi)

(ख) (i)

(ग) (ii)

(घ) (vii)

(ङ) (iii)

(च) (iv)
(छ) (v)

**(आ) उदाहरणमनुसृत्य अधोलिखितानि विशेषण-विशेष्य-पदानि प्रयुज्य वाक्यानि रचयत्-**

कौतुकी कृष्णः - कौतुकी कृष्णः कपिलायाः धनोः दुग्धं पिबति।
(क) चतुरा नारी - ________________
(ख) निर्धनाय पुरुषाय - ________________
(ग) तीक्ष्णैः शरैः - ________________
(घ) विशालेषु वृक्षेषु - ________________

**उत्तराणि:**

(क) चतुर नारी पुष्पाणि मालायां ग्रध्नाति।
(ख) वयं निर्धनाय पुरुषाय शैत्ये शोभनानि वस्त्राणि यच्छन्ति।
(ग) सः तीक्ष्णैः शरैः हरिणं हन्ति।
(घ) वानरः विशालेषु वृक्षेषु फलानि खादति।

8. विपर्ययपदानि समुचित मेलनं कुरुत-

| **खण्ड 'क'** | **खण्ड 'ख'** |
|---|---|
| ददर्श | अददर्श |
| अत्तुम् | पातुम् |
| बध्यते | मुच्यते |
| पुरा | अधुना |
| वनम् | गृहम् |
| पत्नी | पति |
| गच्छसि | आगच्छसि |
| बद्ध्वा | मुक्त्वा |
| सत्वरम् | शनैः-शनैः |
| ययौ | आययौ |
| दूरात् | समीपात् |
| बुद्धिमती | बुद्धिमान् |
| भवान् | भवती |
| अग्रतः | पृष्ठतः |
| चिन्तितवती | अचिन्तितवती |

*********

## 3 पाठ: व्यायाम: सर्वदा पथ्य:

1. निम्न श्लोकान् पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि लिखत-

(क) शरीरायासजननं कर्म व्यायामसंज्ञितम्।
तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः॥

प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-

1. कस्य आयासजननं कर्म व्यायामः इति कथ्यते?
2. किम् कृत्वा सुखं प्रप्नोति?
3. व्यायामः कीदृशं कर्म अस्ति?

**उत्तराणि:**

1. शरीरस्य
2. व्यायामम्
3. शरीरायासजननम्

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. व्यायामात् पुरः किम् कर्त्तव्यम्?
2. व्यायामः कः कथितः?

**उत्तराणि:**

1. व्यायामात् पुरः विमृद्नीयात्।
2. शरीरायसजननम् कर्म व्यायामः कथितः।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. 'सर्वतः' इत्यर्थे किम् पदं अत्र प्रयुक्तम्?
2. 'दु:खम्' इत्यस्य पदस्य विलोमपदं कि लिखितम्।
3. अत्र श्लोके 'परिश्रमः' इत्यस्य पदस्य कः पर्यायः लिखितः?
4. श्लोके 'सुखं देहम्' अत्र विशेषणपदं किम्?

**उत्तराणि:**

1. समन्ततः
2. सुखम्
3. आयासः
4. सुखम्

(ख) शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मजा॥

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. कान्तिः गात्राणां कथम् भवति?
2. शरीरस्य मृजायै कः कर्त्तव्यम्?
3. कस्य उपचयः व्यायामेन भवति?

**उत्तराणि:**

1. व्यायामेन
2. व्यायामः
3. शरीरस्य

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)**

1. व्यायामेन किम्-किम् भवति?
2. व्यायामेन कि दीप्तं भवति?

**उत्तराणि:**

1. व्यायामेन शरीरोपचयः, कान्तिर्गात्राणां, सुविभक्तता दीप्ताग्नित्वमनालस्य स्थिरत्वं लाघवं मजा।
2. व्यायामेन अग्नित्वं दीप्तं भवति।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)**

1. 'अस्थिरत्वम्' इति पदस्य विपर्ययपदं किम्?
2. 'सुविभक्ता' अस्मिन् पदे उपसर्ग पृथक् कृत्वा लिखत।
3. श्लोक 'स्वच्छता' अस्य पदस्य पर्यायपदं किम् अस्ति?
4. 'सुन्दरता' इति पदस्य अर्थे श्लोके किं पदं प्रयुक्तम्?

**उत्तराणि:**

1. स्थिरत्वम्
2. सु + विभक्तता
3. मृजा
4. कान्ति:

(ग) श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता।
आरोग्यं चापि परमं व्यायामादुपजायते॥

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. उष्णशीतादीनाम् सहिष्णुता कथम् जायते?

2. श्रमेण किम् भवति?
3. व्यायामेन केषां सहिष्णता भवति?

**उत्तराणि:**

1. व्यायामेन
2. क्लमम्
3. श्रमक्लमपिपासाण्ण-शीतादीनाम्

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. शरीर व्यायामात् किं किमुपजायते?
2. परमम् आरोग्य केन भवति?

**उत्तराणि:**

1. श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता आरोग्यं चापि परमं व्यायामादुपजायते।
2. परमम् आरोग्यं व्यायामेन भवति।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. 'निरोग्यम्' इति पदस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?
2. 'व्यायामादुपजायते' अत्र क्रियापदं किम् अस्ति?
3. 'आरोग्यं चापि परमं' अत्र विशेष्यपदं किम् अस्ति?
4. श्लोके 'उष्ण' पदस्य विपर्ययः को वर्तते?

**उत्तराणि:**

1. आरोग्यम्
2. उपजायते
3. आरोग्यम्
4. शीत

(घ) न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात्॥

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. स्थौल्यापकर्षणम् कथम् भवति?
2. के व्यायामिनं न अर्दयन्ति?
3. व्यायामेन सदृशं किम् नास्ति?

**उत्तराणि:**

1. व्यायामेन
2. अरयः
3. स्थौल्पायकर्षणम्

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. किम् शत्रवः बलपूर्वकं व्यायामिनम् अर्दयन्ति?
2. व्यायामः कस्य आकर्षणं करोति?

**उत्तराणि:**

1. न शत्रवः बलपूर्वक व्यायमिनम् न अर्दयन्ति।
2. व्यायामः स्थौल्यस्य आकर्षणं करोति।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. 'बलपूर्वकम्' इत्यर्थे किं पदम् अत्र प्रयुक्तम्?
2. 'मर्त्यमर्दयन्त्यरयो' अस्मिन् पदे क्रियापदं किम् अस्ति?
3. 'मित्राणि' इति पदस्य कि विलोमपदं अत्र प्रयुक्तम्?
4. श्लोके 'शत्रवः' इति पदस्य कः पर्यायः आगतः?

**उत्तराणि:**

1. बलात्
2. अर्दयन्ति
3. अरयः
4. अरयः

(ङ) न चैनं सहसाक्रम्य जरा समधिरोहति।
स्थिरीभवति मांसं च व्यायामाभिरतस्य च॥

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. मनुष्यस्य जीवने का सहसा आक्रम्यति?
2. जरा कीदृशस्य जनस्य समीपम् सहसा न समधिगच्छति?
3. जरा कथं मनुष्यजीवनम् आक्रम्यति?

**उत्तराणि:**

1. जरा
2. व्यायामाभिरतस्य
3. सहसा

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. जनस्य मांस कथम् स्थिरी भवति?
2. केन कारणंन मनुष्यस्य मांस स्थिर जायत?

**उत्तराणि:**

1. व्यायामेन मांस स्थिरीभवति।
2. व्यायामाभिरतेन मनुष्यस्य मांस स्थिर जायते।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. अत्र 'चैनं' एनम् पदं कस्मै प्रयुक्तम्?
2. 'अवरोहति' इति पदस्य विपर्ययपदं श्लोके किम्?
3. संलग्नस्य' इति पदस्य पर्यायपदं श्लोके किम्?
4. श्लोके 'जरा' इति कर्तृपदस्य क्रियापदं किमस्ति?

**उत्तराणि:**

1. व्यायामशीलाय
2. आरोहति
3. अभिरतस्य
4. समधिरोहति

(च) व्यायामस्विन्नगात्रस्य पद्भ्यामुवर्तितस्य च।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगा:
वयोरूपगुणीनमपि कुर्यात्सुदर्शनम्॥

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. वैनतेयस्य समीपे कः न आगच्छति?
2. गुणहीनः जनः केन सुदर्शनः क्रियत?
3. पद्भ्याम् उद्वर्तितस्य जनस्य समीप के न आगच्छन्ति?

**उत्तराणि:**

1. सर्पः
2. व्यायामेन
3. व्याधयः

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. जना रोगैः आक्रान्ताः कदा न भवन्ति?
2. व्यायामः कान् जनान् सुदर्शनान् करोति?

**उत्तराणि:**

1. यदा जनाः नियमित रूपेण व्यायाम कुवन्ति तदा ते रोगः आक्रान्ताः न भवन्ति।
2. व्यायामः वयोरूपगुणैः हीनान् जनान् सुदर्शनान् करोति।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. 'कुर्यात्सुदर्शनम्' अत्र क्रियापदं किम्?
2. 'गुणैयुक्तः' इति पदस्य विपर्ययपदं गद्यांशे किम्?
3. 'सर्पाः इति पदस्य पर्यायपदं गद्यांशे किम्?
4. 'व्याधयो नोपसर्पन्ति'। अत्र कर्तृपदं किम्?

**उत्तराणि:**

1. कुर्यात्
2. गुणहीनः
3. उरगाः
4. व्याधयः

(छ) व्यायाम कुर्वतो नित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोष परिपच्यते॥

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. प्रतिदिनं कम् कर्त्तव्यम्?
2. सुचारुरूपेण भोजनम् पाचयितुम् कः कर्तव्यः?
3. व्यायामेन विदग्धमविदग्धं वा भोजनं कथं परिपच्यते?

**उत्तराणि:**

1. व्यायामम्
2. व्यायामः
3. निर्दोषम्

**प्रश्न 2.पूर्णवाक्येनउत्तरत (केवलं प्रश्नमेकमेव)-**

1. अस्माकं शरीरे व्यायामेन कीदृशं भोजनं परिपच्यते?
2. जनः नित्यं कम् कुर्यात्?

**उत्तराणि:**

1. अस्माकं शरीरे व्यायामेन विदग्धम् अविदग्धम् वा भोजनम् परिपच्यते।
2. जनाः नित्यं व्यायाम कुर्यात्।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. ‘विदग्धम्’ इति पदस्य विपर्ययपदं गद्यांशे किम्?
2. ‘पच्यते’ अत्र क्रियापदस्य कर्तृपदं किम्?
3. ‘सुपक्वम्’ इति पदस्य पर्यायपदं किम्?
4. विरुद्धमपि भोजनम्’ अत्र विशेष्यपदं किम्?

**उत्तराणि:**

1. अविदग्धम्
2. भोजनम्
3. विदग्धम्
4. भोजनम्

(ज) व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्।
स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः॥

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. बलवते पथ्यः कः अस्ति?
2. स्निग्ध भोजिने’ क: औषिधि-सदृशं अस्ति?
3. केषां सदा व्यायामः पथ्यः वर्तते?

**उत्तराणि:**

1. व्यायामः
2. व्यायामः
3. बलिनाम्

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. व्यायामः कदा पथ्यतमः भवति?
2. कः सर्वेभ्यः ओषधिः वर्तते?

**उत्तराणि:**

1. शीते वसन्ते च व्यायामः सदा पथ्यतमः भवति।
2. व्यायामः सर्वेभ्यः औषधिः वर्तते।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. ‘लाभदायकः’ इति पदस्य पर्यायपदं किम्?
2. ‘अपथ्यः’ इति पदस्य विपर्ययपदं किम् प्रयुक्तम्?
3. ‘तेषां पथ्यतमः स्मृतः’ अत्र क्रियापदं किम्?
4. ‘व्यायामों’ हि सदा पथ्यः’। अत्र विशेषणपदं किमस्ति?

**उत्तराणि:**

1. पथ्यतमः
2. पथ्यः
3. स्मृतः
4. पध्यः

(झ) सर्वेष्वृतुष्वहरहः पुम्भिरात्महितैषिभिः।
बलस्यार्धेन कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा।।

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)**

1. व्यायामः केषु ऋतुषु कर्त्तव्यः?
2. मनुष्यः कस्य हितैषी अस्ति?
3. कस्य हितैषिभिः व्यायामः कर्तव्य?

**उत्तराणि:**

1. सर्वेषु
2. आत्मनः
3. आत्मनः

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. व्यायामः कदा हानिकारकः न भवति?
2. व्यायामः कदा जनान् हन्ति?

**उत्तराणि:**

1. सर्वेषु ऋतुषु बलस्यार्धेन व्यायामः कर्तव्यः तदा व्यायामः हानिकारकः न भवति।
2. यदा व्यायामः पूर्णबले क्रियते तदा सः जनान् हन्ति।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. 'पुरुषैः' इति पदस्य पर्यायपदं लिखत।
2. सर्वेष्वृतुषु' अत्र विशेष्यपदं किम् अस्ति?
3. 'पूर्णतया' इति पदस्य विलोमपदं किम्।
4. 'बलस्यार्धेन व्यायामः कर्तव्यः।' अत्र क्रियापदं किम्?

**उत्तराणि:**

1. पुम्भिः
2. ऋतुषु

3. अर्धन
4. कर्तव्यः

(ञ) विस्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते।
व्यायाम कुर्वतो जन्तोस्तबलार्धस्य लक्षणम्॥

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. हृदिस्थाने कः भवति?
2. हदिस्थाने स्थितो वायुः कुत्र प्रपद्यते?
3. अत्र कस्य लक्षणम् कथितम्?

**उत्तराणि:**

1. वायुः
2. वक्त्रम्
3. बलार्धस्य

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवलं प्रश्नमेकमेव)-**

1. जन्तोः बलार्धस्य लक्षणम् किम् भवति?
2. वायुः कुत्र स्थितो भवति?

उत्तराणि:

1. हदिस्थान स्थितो वायुयंदा वक्त्रं प्रपद्यते व्यायाम कुर्वता जन्तोः तद् बलार्धस्य लक्षणम्।
2. वायुः हृदिस्थाने स्थिता भवति।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. अत्र श्लोके 'प्रपद्यते' इति क्रियापदस्य कर्तृपदं किम्?
2. श्लोके 'पूर्णबलस्य' इति पदस्य विलोमपदं किम्?
3. अत्र 'जीवस्य' इति पदस्य पर्यायपदं किम्?
4. 'कुर्वतः जन्तोः' अनयोः विशेषणपदं किम्?

**उत्तराणि:**

1. वायुः
2. बलार्धस्य
3. जन्तोः
4. कुवंत:

(ट) वयोबलशरीराणि देशकालाशनानि च।
समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्।।

**प्रश्न 1.एकपदेन उत्तरत (केवलं प्रश्नद्वयमेव)-**

1. व्यायामशीलः कीदृशं भोजनं कुर्यात्?
2. सूर्यासनम् कदा करणीयम्?
3. कानि दृष्ट्वा व्यानाम कुर्यात्?

**उत्तराणि:**

1. अनुकूलम्
2. प्रात:काले
3. वयोबलशरीराणि

**प्रश्न 2.पूर्णवाक्येन उत्तरत (केवल प्रश्नमेकमेव)-**

1. व्यायामशीलः कदा रुग्णः न भवति?
2. यदि नियमत: व्यायामः न क्रियते तदा कि प्राप्यते?

**उत्तराणि:**

1. वयोबलशरीराणि देशकालाशनानि च समीक्ष्य व्यायाम कुर्यात् तदा व्यायामशीलः रुग्णः न भवति।
2. यदि नियमतः व्यायामः न क्रियते तदा रोगं प्राप्यते।

**प्रश्न 3.भाषिककार्यम् (केवलं प्रश्नत्रयमेव)-**

1. 'कुर्याद्' इति क्रियापदस्य कर्तृपदं किम्?
2. 'आयुः' इति पदस्य पर्यायपदं किम्?
3. 'रोगमाप्नुयात्' अत्र क्रियापदं किम्?
4. श्लोके 'स्वास्थ्यम्' इति पदस्य कः विपर्ययः आगतः?

**उत्तराणि:**

1. व्यायामम्
2. वयः
3. आप्नुयात्
4. रोगम्

2. निम्नवाक्येषु रेखांकितपदानां स्थानेषु प्रश्नवाचकपदं लिखत-
(क) व्यायामं कृत्वा सुखं प्राप्नोति।
(i) किम्

(ii) कम्

(iii) काम्

(iv) के

**उत्तराणि:** (ii) कम्

(ख) व्यायामात् आरोग्यम् उपजायते।

(i) कम्

(ii) किम्

(iii) कथम्

(iv) केषाम्

**उत्तराणि:** (ii) किम्

(ग) शरीरस्य मृजायै व्यायामः कर्त्तव्यः।

(i) कः

(ii) कम्

(iii) किम्

(iv) केन्

**उत्तराणि:** (i) कः

(घ) गात्राणां सुविभक्तता व्यायामेन संभवति।

(i) कम्

(ii) कान्

(iii) केन

(iv) कः

**उत्तराणि:** (iii) केन

(ङ) जनैः व्यायामेन कान्तिः लभ्यते।

(i) कः

(ii) को

(iii) के

(iv) केन

**उत्तराणि:** (iv) केन

(च) सर्वदा व्यायाम् कर्त्तव्यः।

(i) का

(ii) कः

(iii) कदा

(iv) कस्मिन्

उत्तराणि: (iii) कदा

(छ) व्यायामेन सुन्दराः भवन्ति।

(ii) का:

(iii) किम

(iv) क:

**उत्तराणि:** (ii) काः

(ज) अरयः व्यायामिनं न अर्दयन्ति।

(i) कयाः

(ii) के

(iii) कः

(iv) काः

**उत्तराणि:** (ii) के

(झ) शरीरस्य मृजायै व्यायामः कर्त्तव्यः।

(i) कः

(ii) कम्

(iii) कने

(iv) कस्य

**उत्तराणि:** (iv) कस्य

(ज) व्यायामेन सुन्दराः किञ्चित् स्थौल्यापकर्षणं नास्ति।

(i) कम्

(ii) कान्

(iii) केन

(iv) कः

**उत्तराणि:** (iii) केन

(ट) व्यायामः गुणैः हीनमपि सुदर्शनं करोति।

(i) कः

(ii) कौ

(iii) कैः

(iv) के

**उत्तराणि:** (iii) कैः

(ठ) बलस्यार्धन व्यायामः कर्त्तव्यः।

(i) क:

(ii) केन

(iii) कान्

(iv) कम्

**उत्तराणि:** (ii) केन

(ड) मनुष्यस्य जीवने जरा सहसा आक्रम्यति?

(i) कः

(ii) का

(iii) किम्

(iv) काम्

**उत्तराणि:** (ii) का

(ढ) मनुष्यस्य मासं व्यायामेन परिपक्वं भवति।

(i) कीदृशं

(ii) किम्

(iii) कीदृशः

(iv) कीदृशी

**उत्तराणि:** (i) कीदृशं

(ण) व्यायामिनः विरुद्धम् भोजनम् अपि परिपच्यते।

(i) कः

(ii) काः

(iii) के

(iv) कस्य

**उत्तराणि:** (iii) के

(त) व्यायामः वसन्तऋतौ अतीव लाभदायकः भवति।

(i) को

(ii) कदा

(iii) काम्

(iv) कैः

**उत्तराणि:** (ii) कदा

(थ) वैनतेयस्य समीपे सर्पः न आगच्छति।

(i) कस्य

(ii) कः

(iii) कदा

(iv) किम्

**उत्तराणि:** (i) कस्य

(द) व्यायामः बलस्यार्धन कर्तव्यः।

(i) कः

(ii) कम्

(iii) केन

(iv) कान्

**उत्तराणि:** (ii) केन

(ध) हृदिस्थाने वायुः भवन्ति।

(i) कुत्र

(ii) का

(iv) किम्

(iv) के

**उत्तराणि:** (i) कुत्र

(न) व्यायामशीलः पौष्टिकं भोजनं कुर्यात।

(i) कीदृशः

(ii) कीदृश

(iv) कीदृशी

(iv) कम्

**उत्तराणि:** (ii) कीदृश

3. अधोलिखितश्लोकानाम् अन्वयं मञ्जूषातः उचितं पद चित्वा पूरयत-

(क) शरीरायासजननं कर्म व्यायामसंज्ञितम् ।
तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः ॥

**अन्वयः-** शरीर आयासजननम् (i) _______ व्यायामसंज्ञितम् (ii) _______ तु (iii) _______ सुख (iv) _______ विमृनीयात्।

**मञ्जूषा-**

| |
|---|
| देहम्, समन्ततः, कर्म, तत्कृत्वा |

**उत्तराणि:**

(i) कर्म

(ii) तत्कृत्वा

(iii) देहम्

(iv) समन्ततः

(ख) शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता ।
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मजा ।।

**अन्वयः-** (i) _______ गात्राणाम् (ii) _______ सुविभक्तता दीप्ताग्नित्वम् (iii) _______ स्थिरत्वं (iv) _______ मजा।

**मञ्जूषा-**

| |
|---|
| लाघवं, कान्तिः, अनालस्यं, शरीरोपचयः |

**उत्तराणि:**

(i) शरीरोपचयः

(ii) कान्तिः

(iii) अनालस्यं

(iv) लाघवं

(ग) श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता।
आरोग्यं चापि परमं व्यायामादुपजायते॥

**अन्वयः-** श्रमक्लमपिपासोष्ण (i) _______ सहिष्णता (ii) _______ आरोग्य (iii) _______ व्यायामाद् (iv) _______।

**मञ्जूषा-** | परमं, उपजायते, शीतादीनां, चापि |

**उत्तराणि:**

(i) शीतादीनां

(ii) परमं

(iii) चापि

(iv) उपजायते

(घ) न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात्॥

**अन्वयः-** (i) _______ तेन (ii) _______ किञ्चित्स्थौल्यापकर्षणम् न (iii) _______ च व्यायामिनं मर्त्यम् अरयः (iv) _______ न अर्दयन्ति।

**मञ्जूषा-** | बलात्, सदृशं, अस्ति, च |

**उत्तराणि:**

(i) च

(ii) सदृशं

(ii) अस्ति

(iv) बलात्

(ङ) न चैनं सहसाक्रम्य जरा समधिरोहति।
स्थिरीभवति मांसं च व्यायामाभिरतस्य च॥

**अन्वयः-** चैन (i) _______ सहसाक्रम्य (ii) _______ समधिरोहति च व्यायामाभिरतस्य (iii) _______ च (iv) _______

**मञ्जूषा-** | मांस, जरा, न, स्थिरीभवति |

**उत्तराणि:**

(i) जरा

(ii) न

(iii) मांस

(iv) स्थिरीभवति

(च) व्यायामस्विन्नगात्रस्य पद्भ्यामुवर्तितस्य च।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः |
वयोरूपगुणहीनमपि कुर्यात्सुदर्शनम् ॥
**अन्वयः-** व्यायामस्विन्नगात्रस्य पद्भ्यामुवर्तितस्य (i) _______ (ii) _______ वैनतेयमिवोरगाः (iii) _______ वयोरूपगुणैीनमपि (iv) _______ कुरयात्।
मञ्जूषा- नोपसर्पन्ति, सुदर्शनम्, व्याधयो, च
उत्तराणि:
(i) च
(ii) व्याधयो
(iii) नोपसर्पन्ति
(iv) सुदर्शनम्
(छ) व्यायाम कुर्वतो नित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोष परिपच्यते॥
**अन्वयः-** नित्यं (i) _______ कुर्वतो विरुद्धमपि (ii) _______ विदग्धमविदग्धं (iii) _______ निर्दोष (iv) _______।
मञ्जूषा- वा, व्यायाम, परिपच्यते, भोजनम्
उत्तराणि:
(i) व्यायाम
(ii) भोजनम्
(iii) वा
(iv) परिपच्यते
(ज) व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्।
स च शीते वसन्ते च तेषां पथ्यतमः समृतः॥
**अन्वयः-** हि व्यायामो (i) _______ बलिनां स्निग्धभोजिनाम् (ii) _______ शीते च (iii) _______ च तेषां (iv) _______ स्मृतः।
मञ्जूषा- सदा, पथ्यो, वसन्ते, पथ्यतमः
उत्तराणि:
(i) सदा
(ii) पथ्यो
(iii) वसन्ते
(iv) पथ्यतमः
(झ) सर्वेष्वृतुष्वहरहः पुम्भिरात्महितैषिभिः।
बलस्यार्धेन कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा॥

**अन्वयः-** आत्महितैषिभिः (i) ________ सर्वेषु ऋतुष अरहरः (ii) ________ अर्धन (iii) ________ कर्तव्यो (iv) ________ हन्त्यतः।

मञ्जूषा- अन्यथा, पुम्भिः, बलस्य, व्यायामो

उत्तराणि:

(i) पुम्भिः

(ii) बलस्य

(iii) व्यायामो

(iv) अन्यथा

(ञ) हृदिस्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते।

व्यायाम कुर्वतो जन्तोस्तबलार्धस्य लक्षणम्॥

**अन्वयः-** यदा हदिस्थानस्थितो (i) ________ वक्त्र (ii) ________ व्यायाम कुर्वतो (ii) ________ तबलार्धस्य (iv) ________।

**मञ्जूषा-** | वायुः, प्रपद्यते, लक्षणम्, जन्तोः |

उत्तराणि:

(i) वायुः

(ii) प्रपद्यते

(iii) जन्तोः

(iv) लक्षणम्

(ट) वयोबलशरीराणि देशकालाशनानि च।

समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्॥

**अन्वयः-** वयोबलशरीराणि (i) ________ च व्यायाम (ii) ________ कुर्याद् (ii) ________ रोगम् (iv) ________

**मञ्जूषा-** | देशकालाशनानि, आप्नुयात्, समीक्ष्य, अन्यथा |

उत्तराणि:

(i) देशकालाशनानि

(ii) समीक्ष्य

(iii) अन्यथा

(iv) आप्नुयात्

4. अधोलिखित श्लोकानाम् भावार्थम् मञ्जूषायाः सहायत्या उचित-क्रमेण पूरयत्-

(क) शरीरायासजननं कर्म व्यायामसंज्ञितम्।

तत्कृत्वा तु सुखं देह विमृद्नीयात् समन्ततः॥

**भावार्थः-** अस्यभावेऽस्ति यत् शरीरस्य (i) _______ कार्यं (ii) _______ कथ्यते। तं कृत्वा जनाः (iii) _______ सुखं प्राप्नुवन्ति अतः समन्ततः शरीरस्य (iv) _______ अवश्यमेव नित्यं कर्तव्यम्।

**मञ्जूषा-** | मर्दनम्, परिश्रमस्य, व्यायामः, दैहिकं |

उत्तराणि:

(i) परिश्रमस्य

(ii) व्यायामः

(iii) दैहिक

(iv) मर्दनम्

(ख) शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।
दीप्ताग्नित्वमनालस्य स्थिरत्वं लाघवं मजा॥

**भावार्थ:-** व्यायात् जनानां (i) _______ शारीरिकसौन्दर्य जठराग्नेश्च (ii) _______वति। सहैव निरालस्यता (iii) _______ सूक्ष्मता (iv) _______ स्वच्छता चापिव्यायामात् भवति।

**मञ्जूषा-** | स्थिरता, शरीरवृद्धि:, शरीरस्य, प्रकाशः (तेजः) |

उत्तराणि:

(i) शरीरवृद्धि:

(ii) प्रकाशः (तेज:)

(iii) स्थिरता

(iv) शरीरस्य

(ग) श्रमक्लमपिपासोष्ण-शीतादीनां सहिष्णुता।
आरोग्यं चापि परमं व्यायामादुपजायते॥

भावार्थ:- आचार्यः सुश्रुतः कथयति यत् व्यायामात् (i) _______ क्लमम् (ii) _______ ऊष्म तापशीतादीनां (iii) _______ एवम् (iv) _______ स्वास्थ्यं भति।

मञ्जूषा- | पिपासा, शारीरिकपरिश्रम, उत्तम, सहनम् |

उत्तराणि:

(i) शारीरिकपरिश्रमं

(ii) पिपासा

(iii) सहनम्

(iv) उत्तम

(घ) न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात्।।

भावार्थ:- व्यायामात् अतिरिक्तं (i) _______ दूरीकरणस्य अन्यः कोऽपि (ii) _______ नास्ति। व्यायाम च कुर्वन्तं (iii) _______ शत्रवः बलात् (iv) _______ समर्थाः न भवन्ति।

मञ्जूषा- | मर्दयितुम्, उपायः, जनं, स्थूलताम् । |

**उत्तराणि:**

(i) स्थूलताम्

(ii) उपाय:

(iii) जन

(iv) मर्दयितुम्

(ङ) न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मांसं च व्यायामाभिरतस्य च॥

भावार्थः- व्यायामे नित्यं (i) _______ जगस्य समीपे (ii) _______ सहसैव कदापि आक्रमणं न करोति, एवमेव (iii) _______ जनस्य मांसम् अपि (iv) _______ निरन्तरम् भवन्ति।

मञ्जूषा- | रतस्य, व्यायामिनः, जरावस्था (वृद्धावस्था), परिपक्वम् |

उत्तराणि:

(i) रतस्य

(ii) जरावस्था (वृद्धावस्था)

(iii) व्यायामिनः

(iv) परिपक्वम्

(च) व्यायामस्विन्नगात्रस्य पद्भ्यामुवर्तितस्य च।

व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः

वयोरुपगुणहीनमपि कुर्यात्सुदर्शनम्॥

भावार्थः- अस्यभावोऽस्ति यत् येजनाः व्यायाम कुर्वन्तः स्वशरीराणि (i) _______ कुर्वन्ति एवं पादाभ्याम् (ii) _______ भवन्ति। तेषां समीपे रोगाः तथैव नागच्छन्ति यथा (iii) _______ समीपे सर्पाः न आयान्ति। व्यायामन जनाः आयुषा, रुपेण (iv) _______ च हीनाः भूत्वा अपि दर्शनीयाः (सुन्दराः) भवन्ति।

मञ्जूषा- | गृध्रस्य, स्वेदयुक्तानि, गुणैः, उत्थिताः |

उत्तराणि:

(i) स्वेदयुक्तानि

(ii) उत्थिताः

(iii) गृध्रस्य

(iv) गुणः

(छ) व्यायाम कुर्वतो नित्यं विरुद्धमपि भोजनम्

विदग्धमविदग्धं वा निर्दोषं परिपच्यते॥

भावार्थः- ये जनाः (i) _______ व्यायाम कुर्वन्ति तेषां (ii) _______ पूर्णतया पक्वं (iii) _______ वा अन्नं (iv) _______ विना एव पचति।

मञ्जूषा- | कष्टम्, अपक्वं, नित्यं, अनुपयोगि |

उत्तराणि:

(i) नित्यं

(ii) अनुपयोगि

(iii) अपक्वं

(iv) कष्टम्

(ज) व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्।
स च शीते वसन्ते च तेषां पथ्यतमः समृतः॥

भावार्थ:- नूनम् व्यायामः सदैव (i) _______ स्निग्धभोजिनाम् च (ii) _______ वर्तते। सः च (iii) _______ वसन्तौ च तेभ्यः अतीव (iv) ______ कथितः।

मञ्जूषा- | लाभदायकः, औषधिः, शीतकाले, बलशालिनां |

उत्तराणि:

(i) बलशालिनां

(ii) ओषधिः

(iii) शीतकाले

(iv) लाभदायक:

(झ) सर्वेष्वतुष्वहरहः पुम्भिरात्महितैषिभिः।
बलस्यार्धेन कर्त्तव्यो व्यायामो हन्त्यतोऽन्यथा।।

भावार्थ:- स्वहितं इच्छन् (i) _______ सदैव सर्वेषु (ii) _______ अर्धन बलेन एव (iii) _______ करणीयः। अन्यथा अत्यधिकस्य बलस्य प्रयोगण व्यायामः (iv) _______ भवति।

मञ्जूषा- | हानिकरः, नरः, ऋतुषु, व्यायामः |

उत्तराणि:

(i) नरः

(ii) ऋतुषु

(iii) व्यायामः

(iv) हानिकरः

(ज) हृदिस्थानस्थितो वायुर्यदा वक्त्रं प्रपद्यते।
व्यायाम कुर्वतो जन्तोस्तबलार्धस्य लक्षणम्॥

भावार्थ:- यदा व्यायाम-काले (i) _______ स्थितः वायु मुखं (ii) _______ अधिगच्छति। तदा सः व्यायामिनः (iii) _______ अर्धस्य बलस्य (iv) _______ भवति।

मञ्जूषा- | यावत्:, हृदयस्थाने, लक्षणं, जनस्य |

उत्तराणि:

(i) हृदयस्थाने

(ii) यावत्

(iii) जनस्य

(iv) लक्षण

(ट) वयोबलशरीराणि देशकालाशनानि च।
समीक्ष्य कुर्याद् व्यायाममन्यथा रोगमाप्नुयात्॥

**भावार्थ:**- अस्यभवोऽस्ति यत् जनस्य कर्तव्यम् अस्तियत् सः स्व आयुः (i) ______ शरीरं देश (ii) ______ भोजनञ्च दृष्ट्वा एवं (iii) ______ कुर्यात्। अन्यथा तु सः शीघ्रमेव (iv) ______ प्राप्स्यर्यत।

**मञ्जूषा-** | रोगान्, बलम्, व्यायाम, समयम् |

**उत्तराणि:**

(i) बलम्

(ii) समयम्

(iii) व्यायामम्

(iv) रोगान्

5. निम्न 'क' वर्गीयपदानाम् 'ख' वर्गीयपर्यायपवैः सह मेलनं कुर्यात-

| वर्ग 'क' | वर्ग 'ख' |
|---|---|
| आयासः | श्रमः |
| समन्ततः | सर्वतः |
| उपचयः | समृद्धि |
| पुम्भिः | नरैः |
| वैनतेय | गरुड़ः |
| अशनानि | भोजनानि |
| मृजा | निर्मलता |
| कान्तिः | सौन्दर्यम् |
| गात्रम् | शरीरम् |
| अरयः | शत्रवः |
| जरा | वृद्धवस्था |
| उरगः | सर्पः |
| पथ्य | स्वास्थ्यप्रद |
| अहनः | दिवसः |
| कालः | समयः |
| वक्त्रम् | मुखम् |
| वायुः | पवनः |
| उष्णः | तापः |
| जन्तोः | जीवस्य |
| अविदग्धम् | अपक्वम् |

6. 'क' स्तम्भे विशेषणपदं लिखितम् 'ख' स्तम्भे पुनः विशेष्यपदम्। तयोः मेलनं कुरुत-

| 'क' स्तम्भ | | 'ख' स्तम्भ | |
|---|---|---|---|
| (क) | परमम् | (i) | बलस्य |
| (ख) | अर्धस्य | (ii) | फलानि |
| (ग) | पक्वानि | (iii) | व्याधः |
| (घ) | दृष्टः | (iv) | गीतं |
| (ङ) | मधुरं | (v) | आरोग्यम् |

**उत्तराणि:**

(क) (v), (ख) (ii), (ग) (ii), (घ) (iii), (ङ) (iv)

7. अधोलिखितपदानां तेषां विपर्ययपदैः सह मेलनं कुरुतः-

| पदानि | विपर्ययपदानि | पदानि | विपर्ययपदानि |
|---|---|---|---|
| सदा | कदा | पथ्यं | अपथ्यम् |
| उष्णः | शीतः | लाभः | हानिः |
| आत्मगतम् | प्रकाशम् | विदग्धम् | अविदग्धम् |
| अरयः | मित्राणि | सुखम् | दुःखम् |
| जरा | यौवनम् | स्मृतरु | विस्मृतः |
| स्थिर | अस्थिरः | उपयोगी | अनुपयोगी |

8. अधोलिखितेभ्यः पदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत-

यथा- सुदर्शनम् - सु + दर्शनम्

(क) उपजायते - ______ + ______

(ख) अपकर्षणम् - ______ + ______

(ग) अधिरोहति - ______ + ______

(घ) प्रपद्यते - ______ + ______

(ङ) सुविभक्तता - ______ + ______

**उत्तराणि:**

(क) उप + जायते

(ख) अप + कर्षणम्

(ग) अधि + रोहति

(घ) प्र + पद्यते

(ङ) सु + वि + भक्तता

********